श्रीमच्छ्रीगजसिंहाख्ये शासति क्षितिमंडलं ।
खवेदवसुभूवर्षे टीकेयं फाल्गुने कृता ॥ ५ ॥
॥ इति श्रीअमरूशतकटीका समाप्ता ॥ ॥ श्रीरस्तु ॥

This is the only Ms. of this commentary recorded by Aufrecht in his Catalogus Catalogorum.

अमरुशतक with टीका विदग्धचूडामणि	Amaruśataka with Commentary Vidagdhacūdāmaṇi
No. 23	270. 1884-86

Size.— 11⅗ in. by 4⅘ in.

Extent.— 28 leaves ; 10 lines to a page ; 38 letters to a line

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing, clear, legible and uniform; borders ruled in black lines; fol. 1 missing; white chalk occasionally used for corrections.

For the name of the commentary and its author cf. the post colophon of Ms. No. 24 below

Age.— Saṁvat 1665.

Author (of the text.)—Amaru.

,, (,, ,, comm.)— Rudramadevakumāra.

Begins.—fol. 2^b

(text) आलोलामलकावलीं तां विभ्रच्चलकुंडलं
किंचिन्मृष्टविशेषकं तनुतरैः स्वेदांभसः शीकरैः
तन्मायत्सुरतांततांतनयनं वक्त्रं रतिव्यत्यये
तत्त्वां पातु चिराय किं हरिहरस्कंदादिभिर्दैवतैः ॥ २ ॥

,, com.) fol. 2^a

......त्कालकृतापराधः कामीव । यथा कश्चिदार्द्रीपराधः कामी युवतिर्नारीभिः हस्तावलग्नः स न क्षिप्यते तथा वथा बलात्कारेण वस्त्रांचलं गृहंस्ताड्यते तथा केशेषु लग्नान्निरस्यते etc.

Ends (text).— fol. 29^a

चक्षुः प्रीतिप्रसक्ते मनसि परिचये चिंत्यमानास्युपाय-
श्चाये रागे गुरुत्वं प्रविकसति । तरां गोचरे दूतिकायाः ।
आस्तां दूरेण तावत्सरसदयितालिगंनानांदलाभ-
स्तद्गेहोपांतरथ्याभ्रमणमपि परां निवृतिं संदधाति ॥ ११२ ॥

,, (comm).— fol. 29^a

कोपि सानुरागो नायको ब्रवीति । स तु कांताश्लेषसंतोषप्राप्तिस्तावद्दूरे तिष्ठतु किं तु त सा भवनसमीपमार्गपरिभ्रमणमपि परमं सुखमुत्पादयति यतोनुयानुरागनिर्मले मनसि तथा परिचये क्रियमाणोपाये कं सति केनोपायेन एतया सह परिचयो भवतिसुपायं करोमि पश्चात्परिचयादनंतरं संयोगे विषये दूतिकायागोचरे गुरुत्वं समुल्लसति चातुर्यमतिशयेन स्फुरति ॥ ॥ इति अमरकृतसमाप्तं ॥ शुभमस्तु ॥

संवत् १६६५ वर्षे आश्वजवदिसप्तमी ॥ ७ ॥ ६ ॥

References.— Aufrecht records only one Ms. of this commentary viz. No 366 of 1887-91 in his Catalogus Catalogorum, III, 7[a]

अमरुशतक with टीका विदग्धचूडामणि

Amaruśataka with Commentary Vidagdhacūdāmani

No. 24

456 / 1891-95,

Size.— 10¼ in. by 4⅗ in.

Extent.— 7 leaves; 21 lines to a page; 62 letters to a line.

Description.— Country paper; very old in appearance, Devanāgarī characters with पृष्टमात्राs; hand-writing, very small but clear, legible and uniform; closely written; borders ruled in black lines; square blanks in the centre of the folios; edges of folios slightly injured; red pigment used, fol. 1 missing.

Age.— Saṁvat 1491; Śaka 1362

Author (of the text.) — Amaru

,, (,, ,, comm.)— Rudramadevakumāra.

Begins.— (?abruptly) fol. 2[b]

(text) कथमपि सखि(खि)क्रीडाकोपाद्व्राजेति मयोदिते
कठिनहृदयः स(श)य्यां त(त्य)क्त्वा बलाद्गतयेव सः ।
इति सरभसध्वस्त प्रेम्णि व्यपेतघृणेस्पृहां
पुनरपि हतव्रीडं चेतः करोति करोमि किं ॥ १५ ॥ etc.

,, (comm) fol. 2[a]

सापराधो नायको नायकां प्रत्याह हे कठिनहृदये निगूढांतः कोपा निगूढमध्यकोपा इदमाकारगोपनं मम हृदयं

Ends.— (text) fol. 8[b]

चक्षुः प्रीतिः etc. up to निर्वृतिं संदधाति ॥ १४ ॥ as in No. 23

Ends—(comm) fol. 8[b]

कोपि सानुरागो नायको ब्रूते etc.

up to चातुर्यमतिशयेन स्फुरति॥ छ ॥

as in No. 23

followed by अमरकशतमिदिमित्थं स्वबुद्धिविभवाद्रसा वितत्वज्ञः रुद्रमदेवकुता(मा)रो विदग्धचूडामणिन्यर्दृणोत् ॥ छ ॥ ग्रंथ ७४६ श्री. ॥ शुभमस्तु लेखकपाठकयोः ॥ छ ॥

संवत् १४९१ वर्षे शाके १३६२ प्रवर्त्तमाने । फाल्गुनवदि १ शनौ पुस्तकं

अमरुशतक with टीका विदग्धचूडामणि

Amaruśataka with Commentary Vidagdhacūḍāmaṇi

No. 25

366.
1887–91.

Size.— $10\frac{2}{5}$ in. by $4\frac{1}{5}$ in.

Extent.— 10 leaves; 19 lines to a page; 55 letters to a line.

Description.— Country paper; white in appearance; Devanāgarī characters with पृष्ठमात्राs; hand-writing beautiful, clear and legible; borders ruled in triple red lines; square blanks in the centre of folios; one corner of folios slightly torn.

Age.— Saṁvat 1643.

Anthoı (of the text).— Amaru.

,, (,, ,, comm.)— Rudramadeva.

Begins (text).— fol. 1[a]

॥ ऍ० ॥ श्रीगणेशाय नमः ॥

ज्याकृष्टिबद्ध etc. as in No. 6

,, (comm) fol. 1[a]

पार्वत्याः कटाक्षो वक्रालोकनं त्वां पातु रक्षतु etc.

Ends (text).— fol. 10[b]

चक्षु· प्रीतिः etc. up to निवृत्तिं संदधाति
as in No. 23

,, (comm) fol. 10[b]

कोपि सानुरागो नायको ब्रूते etc up to चातुर्यमतिशयेन स्फुरति
as in No. 23

followed by अमरशतकमिदं etc. up to विदग्धचूडामणि-र्व्यवृणोत as in No. 24

ग्रंथाग्रं ७४६ श्रीः श्रीशुभमस्तु लेखकपाठकयोः ॥ संवत् १६४३ वर्षे: अश्वनि मासे वदि १३ बुधवासरे। लिखितं मुनिसौभाग्यखेखरेणः ॥ श्री गुरुभ्यो नमः ॥ श्रीः

अमरुशतक — Amaruśataka
with — with
टीका विदग्धचूडामणि — Commentary Vidagdhacūḍāmaṇi

No. 26 — 457. / 1891-95.

Sixe.— $11\frac{1}{3}$ in. by $4\frac{1}{5}$ in.

Extent.— 9 leaves; 11 lines to a page ; 40 letters to a line. (text)
6 ,, ,, ,, ,, ; 52 ,, ,, ,, ,, (comm.)

Description.— Country paper ; very old in appearance ; Devanāgarī characters with पृष्ठमात्राs ; hand-writing bold for the text and small for the commentary ; borders ruled in two double black lines ; square blanks in the centre of folios and in the margins ; verse-numbers marked with red pigment ; this is a पञ्चपाठी Ms. having text in the middle and commentary all around ; complete ; one edge of the folios slightly injured.

Age.— Saṁvat 1579.

Author (of the text).— Amaru.

,, (,, ,, comm.)— Rudramadeva.

Begins (text).—fol. 1ᵃ

॥ ६० ॥ ज्याकृष्टिबद्धetc. as in No. 6

,, (tippanaka) fol. 1ᵇ

॥ ६० ॥ पार्व्वत्याः कटाक्षवक्रावलोकनं त्वा पातु रक्षतु etc.

Ends (text).—fol. 8ᵇ

चक्षुः प्रीतिः etc. up to निवृतिं संदधाति ॥ १६ ॥

as in No. 23

followed by अमरुकशतमिदमिच्छं स्वबुद्धिविभवाद्रसाब्धितत्वज्ञः ।

रुद्रमदेवकुमारौ(रो)विदग्धचूडामणेर्व्यवृणोत् ॥ १७ ॥ (११७)

इति श्रीअमरकविविरचितं श्रीअमरुशतकाभिधान काव्यं समाप्तं ॥ छ ॥ संवत १५७९ वर्षे लि० ।

Ends (tippanaka).— fol. 8ᵇ

कोपि सानुरागो नायको ब्रवीति etc. (११७) up to चातुर्यातिशयेन स्फुरति as in No. 23

followed by इति श्रीअमरुशतकस्यावचूरि परिपूर्णाः जाताः ॥ लिखिता मुनिना पुण्यराजेन स्वविनोदाय ॥ छ ॥

अमरुशतकटीका **Amaruśatakaṭīkā**

No. 27 129. / 1882-83.

Size.— 9½ in. by 4⅖ in.

Extent.— 6 leaves ; 14 lines to a page ; 38 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters ; hand-writing small but clear and legible ; borders ruled in double black lines ; edges of folios damaged but the contents are in tact.

The Ms. is fragmentary and breaks off at the middle of the 15th stanza

Age.— Appears to be old.

Author.— Kokasambhava.

Begins.—fol. 1[b]

श्रीगणेशाय नमः ॥

शिरस्सुपाददानाय प्रारब्ब(ब्ध) परिपंथिनां ॥
अवलंबेऽविलंबेन वैकुंठचरणांबुजं ॥ १ ॥
प्रत्यूहमत्तमातंगविहारणपटीयसे ॥
पंचास्याय नमस्तस्मै रजताचलवासिने ॥ २ ॥
अकालंकरणं शंभोर्मरणं सुरविद्विषां ॥
शरणं सर्वभूतानां भजामि तरुणं महः ॥ ३ ॥
यः साहित्यसुधांभोधौ निष्णातः कोकसंभवः ॥
तनुतेऽमरुकस्यासौ टीकां निष्टंकिताशयां ॥ ४ ॥
पर्याया अपि लिखिताश्चाकांक्षाः पूरितायतः सर्वाः ॥
बहुलतरा टीकेयं नो वाच्या स्यादतो बुधैः ॥ ५ ॥

श्रीमदमरुकनामा कविर्निबंधं निर्मिमाणो महाजनाचारानुरोधेन निर्विघ्नसमाप्तिप्रचयफलकमिष्टस्मृतिपुरस्सरमाशीरूपं मंगलमभिधत्ते ॥ ज्याकृष्टीति॥ ज्याकृष्ट्या मौर्व्याकर्षणेन बद्धो रचितः etc.

Ends.— fol. 6[a]

इतीत्थं सरभसमविचार्य ध्वस्तप्रेम्णिपरित्यक्तहार्दैव्यपेतघृणे निरस्तघृणे तस्मिन् जने हतव्रीडा मुक्तलज्जां मनः पुनरपि यथापूर्वं स्पृहां रंतुमिच्छां करोत्यहं किं करोमि । वारयितुं न शक्नोमीत्यर्थः । कृत्रिमकोपा...........

Aufrecht records only two Mss. of this Commentary viz. Nos. $\frac{129}{1882\text{-}83}$ and $\frac{69}{1883\text{-}84}$ in his catalogus catalogorum.

अमरुशतकटीका — Amaruśatakaṭīkā

No. 28 — $\frac{69.}{1883\text{-}84.}$

Size.— $10\frac{1}{4}$ in. by $4\frac{3}{4}$ in.

Extent.— 35 leaves; 12 lines to a page; 36 letters to a line.

Description.— Country pāper ; very old and worn out ; Devanāgarī characters ; careless and illegible hand-writing ; red and yellow pigment used , corrections made every now and then ; edges of folios slightly damaged ; complete.

Age.— Appears to be old.

Author.— Kokasambhava.

Begins.— fol. 1[b]

॥ र्द० ॥ शिवाभ्यां नमः ॥

शिरस्सु पद्दानाय etc. as in No. 27

Ends.— fol. 35[b]

वेदांतिनामिव सकले जगति अयं वक्ष्यमाणः अद्वैतवादः कः न द्वैतं अद्वैतस्य वादः अद्वैतवादः कः.........*

अयं कः प्रासादे सा दिशि दिशि च सा पृष्टतः सा पुरः सा पर्यंके सा पथि पथि च सा सा सा etc. अयमित्यर्थः । हंहो देश.........*

॥ छ ॥ श्री ॥ शिवमस्तु सर्वजगतः ॥

अश्वधाटीकाव्य — Aśvadhāṭīkāvya

No. 29 — $\frac{325.}{1892-95}$

Size.— $7\frac{1}{2}$ in. by $4\frac{1}{4}$ in.

Extent.— 6 leaves ; 9-10 lines to a page ; 25 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; hand-writing clear, legible and uniform ; borders ruled in single pencil lines ; right-hand side of the folios extremely injured ; complete in 26 verses.

Age.— A modern copy.

Author.— Jagannātha Paṇḍita.

* Letters are illegible.

Subject.— A minor Kāvya in 26 verses.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ।
नमः श्रीसकलराक्षसवृंददमनाय अंका... ·द्रुतक्षितजमंकानभिज्ञ शाशि-
शंकाकरास्य सुषुमं टंकारिचापमतुलं......etc.

Ends— fol. 6[a]

रामनाम्नः स्वपुत्रस्य कामनापूरणोत्सुकः
अश्वधाटीं जगन्नाथो विश्वहृद्यामचीकरत् ॥ २६ ॥
इति पंडितराय जगन्नाथस्य कृतिरश्वधाटी संपूर्णा श्रीरस्तु कल्याण-
मस्तु श्री छ छ

References.— 1 Mss.— Aufrecht's Catalogus Catalogorum i, 34[b]; ii, 7[a]; iii, 8[b].

Cf also A. S. B. Cat. vol. VII No. 5218
Printed in the Subhāṣita-ratnākara, Bombay 1872.

अष्टकs **Aṣṭakas**

No. 30 460. / 1891–95

Size.— 10⅙ in. by 4⅓ in.

Extent.— 7 leaves; 15 lines to a page; 40–42 letters to a line.

Description.— Country paper; Devanāgarī characters with occasional पृष्ठमात्राs; hand-writing closely written but clear and legible; red pigment frequently used for verse-numbers and topical headings and yellow pigment for corrections; borders ruled in two double black lines; square blank space in the centre of every folio.

Age.— The Ms appears to be old.

Author.— Not mentioned.

Subject.— Description of various subjects, each subject being devoted a collection of 8 or 9 verses.

Begins.— fol. 1[a]

॥र्ढ॰॥ शीतांशुस्ते केचिन्निम्नत्वे ये करे विपदि वाञ्छां ।
गर्वमिति चंद्रवदने । सत्पुरुषाष्टमिदं गदितं ॥ १ ॥ etc.

Ends.— fol. 7[b]

आदाय वारि परितः सरितां मुखेभ्यः
किं तावदर्जितमनेन महार्णवेन ।
क्षीरीकृतं च वडवादहने हुतं च
पातालकुक्षिकुहरे विनिवेशितं च ॥ ९ ॥
सद्गुणाष्टकं ॥ १६ ॥ इति श्री.........लेखि

आनन्दकाव्य (सटीक) Ānandakāvya with Commentary

No. 31 $\frac{108.}{1875-76.}$

Size.— $13\frac{3}{5}$ in. by $5\frac{4}{5}$ in.

Extent.—49 leaves ; 10–11 lines to a page ; 45 letters to a line. Com
„ „ „ „ „ „ „ „ 30 „ „ „ „ Text

Description.— Smooth country paper ; Kaśmīri Devanāgari characters ; not very old in appearance ; hand-writing clear, legible and uniform ; text in the middle of the folios with the comm. above and below it ; yellow pigment used for corrections.

Age.— Does not appear to be old.

Author.— Ānanda.

Begins.— (text) fol. 1[a]

सुमित्रात्मजसुप्रीतो निरुद्धबलहर्षितः ।
हरिद्दग्भूतये वोस्तु रामश्चक्रयथ वृत्रहा ॥ १ ॥ etc.

Begins.— (com.) fol. 1[a]

ॐ श्रीगणेशाय नमः ।

ॐ पार्वती पातु नो देवी वीतरोषा भयापहा ।
अभीष्टफलसम्पत्तौ साहाय्यं कुरुतां मम ॥ १ ॥

अतिरमणीयं सुललितपदं सद्गुणालंकाररीत्यनुगतं सर्वरसानुस्यूतं नीतिप्रचुरं षट्षष्टिश्लोकानिबद्धं बालसुविज्ञेयं काव्यं रचयत्यानन्दनामा कविः सुमित्रात्मजेति etc.

Ends—(text) fol 48[b]

चलयन्त्रं समाभज्य विदेहबलसंमतः ।
द्विजेनानुमतो लेभे दृक्सुधां यद्बलान्वितः ॥ ३ ॥

,, (com) fol. 49[a]

तथा द्विजेनानुमतः द्विजानामिनो द्विजे नो ब्राह्मणश्रेष्ठः पिता कश्यपस्तेनानुमतो गच्छ सिद्धिं प्राप्नुहीति तथा च भारतम् ॥ अतःपरं यथैवावतरितं तथैवान्तभूतम् ॥

This is the only Ms referred to by Aufrecht in his Catalogus Catalogorum.

आसफविलास आख्यायिका — Āsafavilāsa Ākhyāyikā

No. 32 $\frac{732.\ (iii)}{1886\text{-}92.}$

Size.— 7⅘ in. by 3½ in.

Extent.— 19[a]–23[b] leaves ; 8 lines to a page ; 30 letters to a line.

Description — See No. $\frac{730\ (i)}{1886\text{-}92.}$

Author.— Jagannātha Paṇḍita.

Subject.— A work in praise of Nawab Āsaphakhāna.

Begins.— fol. 19[a]

श्रीगजवदनाय नमः ॥

अस्ति समस्तप्रशास्तभूपालमस्तकमणिमयूखमास्तालालितचरणनखर-

शरदिन्दुचंद्रिकाचयचमत्कारचुलकितचराचरांतरामितिभिरधोराणिः सपुलकसुरासुरसुंदरी समुद्गीयमानस्फारपारदपरंपरा सहोदरयशः सुधापटलसंगवामांगितवामांगीकवामदेवकलेकलेवरप्रतिभद्रीकृतलोकालोकावनिधरो महस्तरुणतरणिकिरणसरणिसमुल्लासितजगदंडमंडलपुंडरीकः । etc.

Ends.— fol. 23^b

अथ सकललोकनिस्तारविस्तारितमहोपकारपरंपरापराधीनमानसेन प्रतिदिनमुव्यदनवद्यहृद्यगद्यपद्याद्यनेकविद्याविद्योतितांतःकरणै' कविभिरुपास्यमानेन कृतयुगीकृतकलिकालेन कुमततृणजालसमाच्छातिवेदवनमार्गविलोकनाय समुद्दीपितसत्तर्कदहनज्वालाज्वालेन मूर्त्तिमतेव नवावाससफषानमनः प्रसादेन द्विजकुलसेवाहेवाकिवाङ्मनः कायेन माथुरकुलसमुद्रेंदुनागयमुकुंदेनादिष्टेन श्रीसार्वभौमसाहिजहानप्रसादाधिगतपडितरायपदवीविराजितेन लै(तै) लंगकुलावतंसेन पंडितजगन्नाथेनासफविलासाख्येयमाख्यायिका निरमीयत सेयमनुग्रहेण सहृदयानामनुदिनमुल्लसिताभवतात् ॥

इति श्रीतैलंवेगिनाटीयकुलोद्भवश्रीपंडितराजजगन्नाथविरचिता आख्यायिका समाप्ता ॥ श्री ॥ ॥

ईश्वरविलासकाव्य Iśvaravilāsakāvya

No. 33 — 273. / 1884–86.

Size.— $11\frac{1}{3}$ in. by 5 in.

Extent.— 55 leaves ; 10 lines to a page ; 40 letters to a line.

Description.— Country paper ; Devanāgarī characters ; old in appearance ; handwriting clear, legible and uniform ; red pigment used for colophons ; complete.

Age.— The Ms. appears to be old.

Author.— Kṛṣṇa Kavi.

Subject.— A historical Kāvya describing the life of Īśvarasingha (vide colophon of sarga XI " इति श्रीमदीश्वरसिंघचरित्रे श्रीकृष्णकृतौ " etc. on fol. 46^a) son of Savai Jayasinga of Amber.

Begins.— fol. 1^b

॥ श्रीगणेशाय नमः ॥ श्रीहयाननो जयति ॥

विद्युद्वल्लिसमानमंजुमहसा पीतांबरोद्योतिनी
लावण्यैकललामधामललनां कांचिद्दधानं भजे ॥
ह्रीलं भिव्रजयोषितां भवभयाभीलं सलीलं हर-
न्नीलं प्रावृषिजप्रसारिजलदश्रीलंघिशीलं महः ॥ १ ॥

fol. 6^a इति श्रीकृष्णभट्टकृतावीश्वरविलासे वंशानुचरितं नाम प्रथमः सर्गः ॥ १ ॥

fol. 9^b इति श्रीमदीश्वरचरिते ब्रह्मपुरीवर्णनं नाम द्वैतीयः सर्गः ॥ २ ॥

Ends.— fol. 55^b

सेनासागरपूरपूरितधरा चक्रे समंतादहो
वेगादीश्वरा(र)सिंधभूपतिकलानाथे गृहीतोदये ।
सद्यः संप्रति सर्वतः समकुचत्पर्यस्तपत्रव्रजो
राणाकस्य स दुर्यशो मधुकरः सैन्योघपद्माकरः ॥ ३६ ॥

आयातः पुरुहूत एष धरणेर्वीराग्रणीरीश्वरः
प्रोद्यद्वारणवारिदैर्हयबलशेच्चंडपूर्वानिलैः ॥
शंपाशक्तिसमूहदीप्तिविसरैः शौर्योष्मविस्तारणैः
स्तद्राणाकहृदुत्थदर्पदहनः शांतो भवत्तावता ॥ ३७ ॥

इति श्रीमदीश्वरविलासे कविश्रीकृष्णो कृते राणापराभवो नाम चतुर्दशः सर्गः ॥ १४ ॥

This is the only Ms. of the work, recorded by Aufrecht in his Catalogus Catalogorum 1, 61^b.

ईश्वरशतक with टीका — Īśvaraśataka with Commentary

No. 34 — 109. / 1875–76.

Size.— 13^3 in. by 6 in.

Extent.— 26 leaves; 12 lines to a page; 40–42 letters to a line.

Description.— Smooth country paper, Kāśmīri Devanāgarī characters, hand-writing clear, legible and uniform, portion marked with red pigment and corrections made with yellow, the Ms contains different diagrams on the folios.

Age.— The Ms. does not appear to be very old.

Author.— Avatāra.

Begins. (text)— fol. 1[b]

ओं श्रीस्वात्मने गुरवे शिवायैं नमः ।
ओं स वः पायाद्येन निन्ये वा सुकिर्तिजहार ताम् ।
तपोपाघा(या)त्तनुं कोपाद्यः स्मरस्य जहार ताम् ॥ १ ॥

,, (com) fol. 1[b]

स वः पायादित्यादिग्रंथारंभे त्रिविधविघ्नोपघातार्थकविना नमस्कारवाक्यवद्वाचितं सूचितं etc.

Ends.— (text) fol. 26[b]

भो भो भविभूभावी भवि भावै भव भीभुवः ।
भवाय भव वा भावि भवाभिभवभावमित् ॥ ११६ ॥

,, (com) fol. 26[b]

भो भो भव महेश्वरभानां नक्षत्राणां विभुः चंद्रः जटेन्दुरित्यर्थः तस्य आभादीप्तयः ताभिर्विगता इभस्य गजासुरस्य विभा वैभवं यस्मात्तादृशस्त्वमवरक्षमाभित्यर्थः अर्थः प्रकरणं लिंगमित्यलंकारज्ञः भावीयः भवाभिभवः संसारखलीकारस्तस्य यो भावः सत्ता तद्भित् भव वा शब्दो विकल्पे भो भो इति प्रधानामंत्रणे अत्र ...नः कृतान्तात् भियो भयस्य भवस्य भूरुत्पात्तिस्थानं ततः द्व्यक्षरोयं श्लोकः ११६ इति श्रीमहाकव्यवतारकृतमीश्वरशतकं सटीकं समाप्तम् तत्सत् ॥

References.— Aufrecht's Catalogus Catalogorum i, 61[b]; ii, 12[a]. Printed with the comm. in the Kāvyamālā, IX.

उदयभानुकाव्य Udayabhānukāvya

No. 35 274. 1884-86.

Size.— 9 in. by 4 in.

Extent. — 85 leaves ; 7 lines to a page ; 38 letters to a line.

Description.— Country paper; Devanagari characters; old in appearance, hand-writing clear and legible but not uniform; red and yellow pigment used, borders ruled in double, triple and two double black lines; many folios missing; incomplete.

This is a fragmentary Ms.

Age.— The Ms. appears to be old.

Author.— Not mentioned.

Begins— (abruptly) fol. 3^a

सौदर्यमकरंदस्य च्चिरंतननर्त्तक शिखामणेरानर्त्तभूमिरभूमिरापदामनेक लोकाशयंविभक्तरागातिनिवेशवेशविलासिनीकुचपीठमर्द्दकपीठमर्द्दकविदूषक-विटजनानाभिधाना राजधानी ॥ etc.

Ends.— fol. 160^b (180^b)

यावत्ता कथयिविनिहितो गाढगाढानुरागा-
स्तावत्तावत्कमधिकपरीतापकारी ममाभूत् ।
तद्ज्ञातोसि प्रकटकपटागास्संसारपारं
प्राप्तो हंते विनमविनमभ्रातरेषोंजलिस्ते ॥ १ ॥
रे संसार विलोक्य सागरसमं त्वां भीतभीतो भव-
प्राप्तः सेतुकृते ततः सपदिरेरापमृषा मानवं ।
यावत्तस्य पदं स्पृशामि समभू·····द्भवात्
गोप्यदंनो जाने हृदि निद्रवो सपदि ते तस्यापि विस्यादिति ॥ २ ॥
समाप्त ॥ ॥

उदारराघवकाव्य Udārarāghavakāvya

No. 36 369. / 1887-91.

Size.-- $10\frac{3}{4}$ in. by 4 in.

Extent.— 67 leaves; 8 lines to a page; 36-38 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear, legible and uniform; folios slightly discoloured; borders ruled in double black lines; red and yellow pigment used; fol. 23[a] blank; complete.

Age.— The Ms. appears to be old.

Author.— Mallamallayācārya.

Subject.— A poem describing the early life of Rāma.

Begins.— fol. 1[a]

श्रीगोपीजनवल्लभाय नमः ॥

अस्ति प्रशस्तः प्रकृतेः परस्तादाद्यः पुमान्केवलचित्स्वरूपः

स्वानंदपूर्णः सदसत्प्रपंचबाह्यांतरव्याप्तबहुप्रकारः ॥ १ ॥

अनंतकीर्त्तिं तमनंतकोटिब्रह्मांडभांडावृतरोमरंध्रं ॥

समाधियोगैरपरोक्षयंतो भजंति नित्यं हृदि नित्ययुक्ताः ॥ २ ॥ etc.

fol. 8[b] इति सु(सु)खस्वप्नाकलितरघुनाथदत्तवरप्रसादसहजसारस्वतसाकल्यपदांकितमाधवसुधीतनयकविमल्लमल्लयाचार्यविरचिते उदारराघवे महाकाव्ये प्रथमसर्गः ॥ छ ॥

fol. 17[b] इति etc. .... द्वितीयसर्गः ॥ छ ॥

Ends.— fol. 67[a]

नवशोसिते नासिकं धयी सा विरटंती विपिनानि वेपयंती ।

खरदूषणयोः पुरः पतित्वा निजवृत्तांतमजिज्ञपन्निशाटी ॥ १०७ ॥

श्रुत्वा तत्परिभवमूलमुत्पतिष्णुर्वर्त्तिष्णः समिति पराग्निराकरिष्णुः ॥

रक्षोभिः सदसिखरप्रलापः प्राज्वालीदनल इवाज्यपूरसिक्तः ॥ १०८ ॥ छ ॥

इति श्रीसुखस्वप्नाकलितरघुनाथदत्तवरप्रसादसहजसारस्वतशाकल्यपदांकमाधवसुधीतनयकविमल्लमल्लयाचार्यविरचिते उदारराघवे महाकाव्ये नवमः सर्गः ॥ छ ॥ श्रीमद्गोवर्द्धनोद्धरणधीरः शरणं मम ॥ ॥ पुस्तकमिदं कल्याणरायाणाम्

References.— 1 Mss. Aufrecht's Catalogus Catalogorum, i, 65[b], ii, 13[a]; iii, 15[a].

For described Mss. cf. I. O. Cat pt. VII, Nos. 3922-23

उदारराघवटीका called शिशुबोधिनी

Udārarāghavaṭīka called Śiśubodhinī

No. 37

805. / 1886-92.

Size.— $10\frac{1}{4}$ in. by $3\frac{3}{4}$ in.

Extent.— 7 leaves, 19-20 lines to a page, 60-65 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear but very small and closely written; portion on some folios is scratched out, edges of folios slightly worn out, borders ruled in double black lines; incomplete.

The Ms. breaks off at the 44th verse.

Age.— The Ms. appears to be old.

Author.— Mahādeva.

Subject.— A commentary on the Udārarāghava of Mallamallācārya.

Begins.—fol. 1[b]

॥ श्रीदक्षिणामूर्त्तये नमः ॥

देवं विघ्नपतिं प्रणम्य वरदं श्रीशारदा सर्वदां

श्रीकालीं कुलदेवतां च मतिदान्सर्वान्गुरून्सादरं ।

कुर्वेहं शिशुबोधिनीं मितपदव्याख्यां यथा मूलत-

स्तूदारादिकराघवस्या(स्य,जडधीर्विद्वान्महादेवकः ॥ १ ॥

शेमुखी बलवशेन योखिलं न्यायशास्त्रममलाशयः परं ।

व्याकरोद्विबुधराजसंन्निधौ गोपिनाथगुरुमानमामि तं ॥ २ ॥ etc.

Ends.— fol. 7[b]

यत्र माधवी लतायां मंजुमंजरीं न सुंदरावल्लरी न । सा मंजरी न ।

यत्र मंजर्यां सौरभं न तच्च सौरभं न । यत्र सौरभे षट्पदाः भ्रमराः न संति अयमाशयः । यत्र माधवी लता नास्ति तद्वनमेव नास्ति । सर्वाणि वनानि वा संतीलता सहितानीत्य·········

This is the only comm. referred to by Aufrecht in his Catalogus Catalogorum ii, 13.

ऋतुसंहार Ṛtusaṁhāra

No. 38 $\frac{324.}{1884-87.}$

Size.— $12\frac{1}{5}$ in by $5\frac{1}{2}$ in.

Extent.— 11 leaves; 10 lines to a page; 40 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing clear, legible, bold and uniform; colophons of every chapter and folio-numbers are written in red ink; borders in triple red lines; folio-numbers in both the margins.

The work is ascribed to Kālidāsa. It contains the description of six seasons of the year.

Age.— Saṁvat 1859.

Author.— Kālidāsa.

Begins.— fol 1ᵇ

॥ ए० ॥ श्रीगणेशाय नमः ॥ अथ षड्ऋतुवर्णनं ॥

प्रचंडसूर्यः स्पृहणीयचंद्रमाः सदावगाहक्षतवारिसंचयः ॥
दिनांतरम्योभ्युपशांतमन्मथो निदाघकालः समुपागतं प्रिये ॥ १ ॥
निशाः शशांकक्षतनीलराजयः क्वचिद्विचित्रं जलयंत्रमंदिरं ॥
मणिप्रकाराः सरसं च चंदनं शुचौ प्रिये यांति जनस्य सेव्यतां ॥ २ ॥
सुवासितं हर्म्यतलं मनोरमं प्रियामुखोच्छ्वासविकंपितं मधु ॥
सुतंत्रगीतं मदनस्य दीपनं शुचौ निशीथेनुभवंति कामिनः ॥ ३ ॥

निर्तबबिंबैः सदुकूलमेखलैः स्तनैः सहाराभरणैः स चंदनैः ॥
शिरोरुहैः स्नानकषायवासितैः स्त्रियो निदाघं शमयंति कामिनां ॥ ४ ॥
नितांतलाक्षारसरागरंजितैर्नितंबिनीनां चरणैः सनूपुरैः ॥
पदे पदे हंसरुतानुकारिभिर्जनस्य चित्तं क्रियते समन्मथं ॥ ५ ॥ etc.

folio 3^a इति श्रीविशेषकाव्ये कालिदासकृतौ ग्रीष्मवर्णनो नाम प्रथमः सर्गः ॥१॥
folio 5^a इति etc. ... .. . प्रावृड्वर्णनो नाम द्वितीयः सर्गः ॥२॥
folio 6^b इति etc ... ... शरदृतुवर्णनो नाम तृतीयः सर्गः ॥३॥
folio 8^a इति etc. ... ... हेमंतवर्णनो नाम चतुर्थः सर्गः ॥४॥
folio 9^a इति etc. ... ... शिशिरवर्णनो नाम पंचमः सर्गः ॥५॥

Ends.— fol. 11^b

उत्कंपितानि हृदयानि मनस्विनीनां वातैः प्रियंगुसहकारकृताधिवासैः ॥
उद्वासितैः परभृतस्य मदाकुलस्य श्रोत्रप्रियैर्मधुकरस्य च गीतशब्दैः ॥ ३२ ॥
रम्यः प्रदोषसमये पटुचंद्रभासैः पुंस्कोकिलस्य विरुतं पवनः सुगंधिः ॥
मत्तालियूथविरुतं निशसीधुपानं सर्वं हि शासनमिदं कुसुमायुधस्य ॥ ३३ ॥
छायां जनः समभिकांक्षति कामिनीनां गीतं तथैव हि पुनः किरणाच्च भानोः ॥
हर्म्येषु चातिपृथुशीतलकेषु नित्यं कांतासुखं समुपगृह्यतु शीतलत्वात् ॥ ३४ ॥

इति श्रीकविकालिदासकृतावृतुसंहारे विशेषकाव्ये वसंतवर्णनो नामः षष्ठः सर्गः ॥ ६ ॥ श्रीरस्तु ॥ शुभं भूयात् ॥ संवत १८५९ का मिती भाद्रमासे कृष्णपक्षे तिथौ तृतीयायां चंद्रवासरे ॥ लिखिता पन्वेवरमध्ये शिवनाथेन ॥ श्रीरघुनंदनकिंकरेण ॥ स्वपठनार्थं ॥ श्रीरस्तु ॥

References.— (1) Aufrecht's Catalogus Catalogorum:— i, 73^a; ii, 14^a; iii, 16^a.

(2) Winternitz— *History of Indian Literature*:— Vol. III pages 46, 109–111, 114, 643f.

(3) A. B. Keith– *History of Sanskrit Literature*:— pages xiii. 82–4, 99, 107.

(4) Printed Editions·— Numerous editions have been published of which the following are notable:—

1 with the com. of Manirāma, Nirnayasāgara Bombay; 2 Ed. with संस्कृत comm. बालबोधिनी by A. B. Gajendragadkar with intro. notes and appendices, 1916; (3) with

notes and Engl. translation by Sītārāma Ayyer, 1897; (4) by B. G. Kher and V. R. Nerurkar, (5) by M. R. Kale; (6) ed. with preface of Sir William Jones, by Herman Kreyenberg, 1924, Hannover.

ऋतुसंहार Ṛtusaṁhāra

No. 39 275. / 1884-86.

Size.— $10\frac{1}{2}$ in. by $2\frac{3}{4}$ in.

Extent.— 21 leaves; 5 lines to a page; 38 letters to a line.

Description.— Country paper; old in appearance; edges slightly worn out; Devanāgarī characters; hand-writing clear, legible and uniform, margins ruled in double black lines; folios numbered in left and right-hand margins, folio 21[b] blank; slightly moth-eaten; yellow pigment occasionally used for corrections.

The work is called ऋतुवर्णन.

Age.— Samvat 1754.

Author.— Kālidāsa.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥

विशेषकांत (प्रचंडसूर्यः) स्पृहणीयचन्द्रमाः etc. ... ...

as in No. 38

folio 4[b] इति श्रीकालिदासकृतौ ग्रीष्मवर्णनो नाम प्रथमः सर्गः ॥

Ends.— fol. 20[b]

आकंपितानि हृदयानि etc. up to शासनमिदं कुसुमायुधस्य

as in No. 38

followed by —

बहुलकुसुमरम्यः कामिनां कामभूतः पथिकजनवधूनां चित्तसंतापहर्ता ॥

मधुकरपिकनादैर्जातवादप्रपंचः प्रदिशतु सुखमाशु प्रायशो विवंशताः(?) ॥३२॥

मृदुपवनविधूतैश्चूतशाखिसनै सुरमितसकलाशो रम्यचंद्रप्रकाशः ॥
जनितमदनवेगः कामिनीसंगयोग्यः सुखयतु मधुमासः कांतहर्म्याधिवासः ॥३२॥
इति श्रीकालिदासकृतौ ऋतुवर्णने वसंतवर्णनो नाम षष्टः सर्गः समाप्तं ऋतुवर्णन काव्यं संपूर्ण ॥ ॥ श्री शुभं भवतु ॥ संवत १७५४ ॥ भाद्रपदकृष्णचतुर्थ्यां भौमवासरे शुभदिने पुस्तकमिदं लिखितं रूपमभिणा आत्मपठनार्थं परोपकारार्थं च ॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ।
यदि शुद्धमशुद्धं वा मम दोषो न दियते ॥ राम श्री

References.— See No. 38

ऋतुसंहार Ṛtusaṁhāra

No. 40 370 / 1887-91,

Size.— 11⅕ in. by 5 in.

Extent.— 6 leaves ; 16 lines to a page ; 40 letters to a line.

Description.— Country paper ; old and brittle ; edges slightly worn out ; Devanāgarī characters ; hand-writing clear, legible and uniform ; पृष्टमात्राs used , fol. 6 slightly moth eaten ; square blanks in the centre of the folios ; borders ruled in two double black lines ; folios not numbered.

Age.— The Ms. appears to be old

Author.— Kālidāsa.

Begins.—fol. 1ª

॥ ॐ ॥ नमः श्रीपरमात्मने ॥
प्रचंडसूर्यः स्पृहनी(णी)यचंद्रमाः etc.

as in No. 38

folio 2ª इति श्रीकालिदासकृतौ ऋतुग्रीष्मवर्णनो नाम प्रथमः सर्गः ॥

Ends.—fol. 6ᵇ

कुंदैः सविभ्रमवधूहसितावदातैरुद्योतितान्युपवनानि मनोहराणि ॥
चेतं मुनेरपि हरंति निवृत्तरागं प्रागेव रागमलिनानि मनांसि पुंसां ॥ २४ ॥

आलब्धचंदनरसाः स्तनसक्तहाराः कंदर्पदर्प्पशिथलीकृतगात्रयष्ट्यः ॥
मासे मधौ मधुरकोमलभृंगनादैर्नार्यो हरंति हृदयं प्रसभं नराणां ॥ २५ ॥

इति श्रीविशेषमहाकाव्ये कालिदासविरचिते ऋतुसंहारे वसंतवर्णनो नाम षष्टम सर्गः ॥ ॥ श्री अहिपुरमध्ये । श्रीनागपुरीतपागछे ॥ पं० श्रीशिवसुंदरशिष्य अमृतसुंदर । तत् सिष्यहेमसुंदरेण लिषतं ॥ सुकीय आत्मनपावनाय । चिरं नंदतु कर्म्मरत्नप्रसादात् ॥

References.— See No. 38

ऋतुसंहार **Ṛtusaṁhāra**

No. 41 $\frac{464.}{1891-95.}$

Size.— 9 in. by $2\frac{1}{5}$ in.

Extent.— 23 leaves; 5 lines to a page; 35 letters to a line.

Description.— Country paper; old and musty; edges damaged; Devanāgarī characters; carelessly written; borders ruled in double red and black lines; something written on fol. 1[a].

Age.— The Ms. appears to be old.

Author.— Kālidāsa.

Begins.— fol. 1[b]

श्रीगणेशाय नमः ॥

प्रचंडसूर्यः स्पृहणीयचंद्रमाः etc. as in No. 38

folio 5[b] इति श्रीकालिदासकृतौ ऋतुसंहारकाव्ये ग्रीष्मवर्णनो नाम प्रथम सर्गः
folio 9[b] इति etc. ... ... प्रावृद्वर्णनं नाम द्वितीयः सर्गः
folio 14[b] इति etc. ... ... शरद्वर्णनं नाम तृतीयः सर्गः
folio 17[a] इति etc. ... ... हेमंतवर्णनं नाम चतुर्थः सर्गः
folio 20[a] इति etc. ... ... शिशिरवर्णनं नाम पंचमः सर्गः

End.— 23[b]

नानामनोज्ञकुसुमद्रुमभूषितां तान्दृष्ट्वान्यपुष्टविनदाकुलसंधिदेशान् ॥
शैलेयजालपरिणद्धशिलोतलांतान्दृष्ट्वा जनः क्षितिभृतः समुपैति सर्वान् ॥२५॥

नेत्रे निमीलति विरोदिति जातमोहात्त्राणात्वरेण विरुणद्धि विगेति चोच्चै· ॥
कांतावियोगपरिखेदितचित्तवृत्तिर्दृष्ट्वा नर· कुसुमितान्सहकारवृक्षान् ॥ २६ ॥
इति श्रीकविचक्रवर्त्ती कालिदासकृतौ ऋतुसंहारकाव्ये षष्ठः सर्गः
समाप्त: ॥ छ ॥ छ ॥ छ ॥

References.—See No. 38

ऋतुसंहार Ṛtusaṁhāra

No. 42 18. / A1882-83.

Size.— 8½ in. by 3½ in.

Extent.— 18 leaves ; 7 lines to a page ; 30 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing clear, legible and uniform; margins ruled in four black lines; red pigment used for verse-numbers and colophons; occasional marginal notes.

Age.— Saṁvat 1650.

Author.— Kālidāsa.

Begins.— fol. 1[b]

॥ ६० ॥ स्वस्ति श्रीगणेशाय नमः ॥

प्रचंडसूर्यः स्पृहणीयचंद्रमाः etc. as in No. 38

folio 4[b] इति श्रीऋतुसंहारे महाकाव्ये कविश्रीकालिदासकृते ग्रीष्मवर्णनो नाम प्रथमः सर्गः ॥ १ ॥

Ends.— fol. 18[a]

कुंदैः ससंभ्रमवधूहसितावदातैः etc. up to प्रसभं नराणाम् ॥ २५ ॥
as in No. 40

इति श्रीऋतुसंहारे महाकाव्ये कविश्रीकालिदासकृते वसंतवर्णनो नाम षष्ठः सर्गः ॥ ६ ॥ संवत् १६५० वर्षे ॥ जेष्टमासे । शुक्लपक्षे ॥ लेखक

लक्ष्मीदासेन लिषितमिदम् ॥ लिषापितं गोकुलदासेन स्वपठनार्थं ॥ शुभं भवतु ॥

References.— See No. 38

ऋतुसंहार **Ṛtusaṁhāra**

No. 43 371. / 1887-91.

Size.— 10 $\frac{1}{5}$ in by 4$\frac{1}{5}$ in.

Extent.— 6 leaves ; 14-16 lines to a page ; 46 letters to a line.

Description.— Country paper ; old in appearance , Devanāgarī characters , hand-writing clear, legible and uniform ; पृष्ठमात्राs used ; borders ruled in two double black lines ; square blanks in the centre of the folios ; yellow pigment used for corrections.

The Ms. is almost complete except the last two st. of the 6th chapter of Ms. No. 38

Age.— The Ms. appears to be old.

Author.— Kālidāsa.

Begins.— fol. 1[a]

॥ऌ०॥ प्रचंडसूर्यः स्पृहणीयचंद्रमाः etc. as in No. 38

folio 2[a] इति श्रीकालिदासकृतौ ऋतुवर्णने प्रथमः सर्गः॥

Ends.— fol. 6[b]

मदसुरभिमुखाब्जं लोचने लोलताम्रे नवकुरवकमाल केशपाशोमनोज्ञः ॥
कृतवसनमनोज्ञः श्रोणिर्बिबस्तथैव । न भवति किमिदानीं योषितां यन्नचारुः२१
उत्कंपितानि हृदयानि मनस्विनीनां वालैः प्रियंगुसहकारकृताधिवासैः ॥
उद्भासितैः परभृतस्य मदाकुलस्य । श्रोत्रप्रियैर्मधुक........

References.— See No. 38

ऋतुसंहार — Ṛtusaṁhāra

No. 44 — $\frac{121. (1)}{1866-68}$

Size.— $12\frac{1}{2}$ in. by $7\frac{1}{2}$ in.

Extent.— 11 leaves ; 11 lines to a page ; 35 letters to a line.

Description.— Modern paper with water marks, bluish in colour ; Modern Devanāgarī characters, hand-writing very bold and beautiful ; The Ms. is a bound copy containing two other works viz. बिल्हणशतक and घटकर्परकाव्य.

The Ms. of ऋतुसंहार contains the following chronogram on folio 11[b] :- वसुनागभूपसंमितशके i. e. Śaka 1688. This seems to be the date of the original Ms. from which the present Ms. was copied.

Age.— The Ms. is a new copy.

Author.— Kālidāsa.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥

प्रचंडसूर्यः स्पृहणीयचंद्रमाः etc. as in No. 38

folio 3[a] इति श्रीकालिदासकृतौ ऋतुसंहारे महाकाव्ये ग्रीष्मवर्णनं नाम प्रथमः सर्गः ॥ १ ॥

Ends.— 11[b]

कुंदैः सविभ्रमवधूहसितावदातैरुद्योतितान्युपवनानि मनांसि पुंसां ॥
अत्यंबहेमरसनास्तनसक्तहाराः कंदर्पदर्पशिशिरीकृतगात्रयष्ट्यः ॥ २२ ॥
मासे मधौमधुरकोमलभंगदेता यूनो हरंति प्रसभं हृदयं रमण्यः ॥

इति श्रीकालिदासकृतौ ऋतुसंहारे महाकाव्ये वसंतवर्णनं नाम षष्टः सर्गः ॥ ६ ॥ वसुनागभूपसंमितशके व्ययाब्दे सहस्यासितपक्षे व्यालतिथौ लोहितांगवसरे इदं ऋतुसंहाराख्यं काव्यं लिखितं ॥ ॥ ॥

References.— See No. 38

ऋतुसंहार
with
टीका

Ṛtusaṁhāra
with
Commentary

No. 45

372.
1887-91.

Size.— 10 $\frac{1}{5}$ in. by 4$\frac{2}{5}$ in.

Extent.— 10 leaves ; 17-18 lines to a page ; 50 letters to a line.

Description.— Country paper ; old and brittle ; Devanāgarī characters ; hand-writing small but clear, legible and uniform ; right-hand edges of folios damaged ; borders ruled in two double black lines , folios 1, 2, 10 and 11 missing , yellow pigment used.

A fragmentary Ms. Folio 4[b] contains the follwing colophon which shows that *Amarakīrti* was a pupil of *Gunākara Sūri.*—

श्रीमानकीर्त्तिवरसूरिगुणाकराणां
पट्टेऽस्तु वै अमरकीर्त्तिविनिर्म्मि(ता)यां ।
श्रीमद्विशेषमहानथकाव्यवृत्तौ
सर्गोऽजनि प्रथम एष नृपाभिरम्यः ॥

Age.— The Ms. appears to be old.

Author (of the text).— Kālidāsa.

„ „ „ comm.)— Amarakīrti.

Begins (abruptly).— fol. 3[a]

(text) तृषा महत्याहतविक्रमोथमः श्वसन्म(न्मु)हुर्दूरविदारिताननः ॥
न हंत्यदूरेपि गजान्मृगाधिपो विलोलजिह्वः स्खलिताग्रकेसरः ॥ १६ ॥

(comm)......किं भूतेन विवस्वता तीक्ष्णतरांशुमालिनी । अतिशयेन तीक्ष्णग्रीष्मत्वा-त्तीव्रायेंशवः किरणास्तीक्ष्णांतरांशवस्तान् मलते धारयति तथा तेन मलमल्लु-धारणा कथंभूतो भेकोऽभितापितो विवस्वतेत्यनुवर्णनीयं अनेन धर्म्मबाहुल्यं सूचितं ॥ १५ ॥ etc.

fol. 4[b] इति अमरकीर्त्तिसूरिकृतायां टीकायां श्रीग्रीष्म(ऋ)तुवर्णनो नाम प्रथमः सर्गः ॥

fol. 8b इति श्रीअमरकीर्तिसूरिकृतायां श्रीकालिदासकृतविशेषकाव्य टीकायां प्रावृट्वर्णनो नाम द्वितीयः ॥

fol. 12b इति श्रीअमरकीर्त्तिकृतायां कविश्रीकालिदासविरचितविशेष-काव्यटीकायामृतुसमुदाये शरदृतुवर्णनो नाम तृतीयः सर्गः ॥

Ends— fol. 14b

(text) अन्याप्रकामसुरतश्रमखिन्नदेहा । रात्रौ प्रजागरविपाटलनेत्रपद्मा । आवक्त्रदेशलुलिताकुलकेशपासा । निद्रां प्रयांति मृदुसूर्यकराभितप्ता ॥ १४ ॥

(comm.) अन्या काश्चित् स्त्री मुहुर्योसौ सूर्यः तत्काले दिनरविस्तस्य करैः किरणै रभितप्ता मृदुसू........

Aufrecht mentions the present Ms. only in his Catalogus Catalogorum. p. iii, 16a.

कंसनिधनकाव्य Kaṁsanidhanakāvya

No. 46 276. / 1884-86.

Size.— 14 in. by 5½ in.

Extent.— 51 folios; 11 lines to a page; 49 letters to a line.

Description.— Country paper, thick and whitish in apperrance, Devanāgarī characters; hand-writing bold, uniform and legible; the poem is called "निरोष्ठकाव्य" in the colophon (folio 51); it consists of 17 chapters as under:—

Sarga	Folios	Sarga	Folios
I	1 - 3	X	28 - 31
II	3 - 6	XI	31 - 34
III	6 - 9	XII	34 - 36
IV	9 - 14	XIII	37 - 38
V	14 - 16	XIV	38 - 41
VI	16 - 20	XV	41 - 45
VII	20 - 22	XVI	45 - 48
VIII	22 - 25	XVII	48 - 51
IX	25 - 28		

Age.— The Ms is not very old.

Authoi — Srīrāma.

Begins — fol. 1b

॥ श्रीनंदनंदनो जयति ॥
आनंदयिष्यन्निखिलां धरित्रीं
निराकरिष्यन् दितिजाधिराजान्
जनिंजगद्गीतयशाह्यशार्ङ-
संतानगेहे हरिरासताव ॥ १ ॥
कंसादनर्थैकरतान्वितांतं
साशंकचेता जनकस्तदास्य
आदाय तं नीरदजाललीढे-
शनैर्निशीथे निरगादगारात् ॥ २ ॥ etc.

fol. 3b इति श्रीश्रीरामकृतौ कंसनिधननामधेये महाकाव्ये प्रथमः सर्गः

fol. 6b इति etc. ... ... द्वितीयः सर्गः

Ends.— fol. 51a

एनं गणेन सह संयति संनिहत्य
कंसं सहं ससहिताधिकहारिकीर्त्तिः ।
आनर्च्चसीरिसहितः शिरसा नतेन
शांतादरेण जनकं जननीं च कृष्णः ॥ ७१ ॥
रणे निघ्नन्नित्थं निखिलखल चक्रं नतिकृतां
कृतांतीयं त्रासं निरतिशयिताधिंशकलयन् ।
घनानंदं सेंद्रत्रिदशगणगीतास्थिरयशा-
निरातंकं चक्रे त्रिजगदखिलं नंदतनयः ॥ ७२ ॥

इति श्रीश्रीरामकृतौ कंसनिधननामधेये महाकाव्ये सप्तदशः सर्गः १७
कंसनिधनाख्यं निरोष्टकाव्यमिदं ॥ ग्रंथसंख्या १५७५ ।

This is the Ms. recorded by Aufiecht in his Catalogus Catalogorum.

करुणालहरी Karunalaharī

No 47

325
1884-87

Size.— 7 in. by 4 in.

Extent.— 7 leaves; 8 lines to a page; 25 letters to a line.

Description.— Country paper, Devanāgarī characters, old in appearance; hand-writing clear, legible and uniform; text bounded on either side by two thick black lines, red pigment frequently used, complete.

Age.— The Ms appears to be old.

Author.— Jagannātha.

Subject.— A stotra.

Begins.—fol. 1[b]

श्रीगणेशाय नमः।
निषीदत्तानाथविषानलोपमे विषादभूमौ भवसागरे हरे ॥
परं प्रतीकारमपास्यताधुना मयायमात्मा भवते निवेदितः ॥ १ ॥ etc.

Ends.— fol. 7[a]

सुरस्रोतस्विन्याः पुलिनमधितिष्ठन्नयनयो-
र्विधायांतर्मुद्रामथ सपदि विद्राव्य विषयात।
विधौ तांतर्ध्वांतो मधुरमधुरायां च्चितिकदा
निमग्नः स्यां कस्यां चनतवनमस्यांबुदरुचि ॥ ५४ ॥ श्री ॥
इति श्रीजगन्नाथविरचितायां करुणा(ऌह)री संपूर्णः ॥श्री॥छ॥श्री॥छ॥

करुणालहरी Karuṇalaharī

No. 48

277.
1884-86.

Size.— $8\frac{2}{5}$ in. by $4\frac{1}{2}$ in.

Extent. – 4 leaves; 12 lines to a page; 30 letters to a line.

Description.— Country paper; Devanāgarī characters; old in appearance; hand-writing clear, legible and uniform written part of the folios rendered black owing to the diffusion of ink; borders ruled in double black lines; red pigment used for verse-numbers; complete.

Age.— The Ms appears to be old.

Author.— Jagannātha.

Begins.— fol. 1[a]

॥ श्रीगुरुचरणेभ्यो नमः ॥

निषीदतानाथ etc. as in No. 47

Ends.— fol. 4[a]

सुरश्रोतस्विन्याः etc. up to नतवनभस्यांबुदरुचि ॥ ५४ ॥
as in No. 47

followed by इति भट्टजगन्नाथेन तैलिंगेन रचिता करुणालहरी संपूर्णा ॥ छ ॥ श्री ॥

There are some additional verses on the last folio.

कर्णानन्द with **टीका °प्रकाशिनी**

Karṇānanda with Commentary °Prakāśinī

No. 49

542.
1884-87.

Size.— 10 in. by $4\frac{3}{4}$ in.

Extent.— 38 leaves; 8 lines to a page; 20 letters to a line.

Description.— Country paper; old and dirty in appearance Devanāgarī characters; hand-writing of the text, bold and of the comm. small; this is a पञ्चपाठी Ms, text being in the middle and comm. on all sides; borders ruled in black lines; red pigment used.

The work was composed in Śaka 1500. The comm. was composed by one Prabodha.

Age.— The Ms is fairly old.

Author (of the text).— Kṛṣṇadāsa.

,, (,, ,, comm.)— Śrīprabodha.

Begins.— fol. 1[b]

॥ ६० ॥ श्रीराधावल्लभाय नमः ॥

(text) स्फुरद्वदनपंकजः कनककूटदेहद्युतिः
प्रशास्तसुखसंपदां निधिरपूर्थमानप्रदः ।
सकृष्णवृषभानुजाचरणमाधुरीयं चुरः
सदा मधुरवाक्यदुज्जयति साधु वैयासिकिः ॥ १ ॥ etc.

comm......... फलिताक्षरसंभासा कृष्णकीर्त्तिविधुश्रिता ।
... ... हेतुरेषार्थकौमुदी ॥ २ ॥
मिताक्षरार्थगंभीरा धीरांतर्म्मोददायिनी ।
व्याकृति ·· ... श्रीमत्कर्णानन्दप्रकाशिनी ॥ ३ ॥
तदुपादिष्टदेवतां श्लोकद्वयेन नमस्करोति etc.

Ends— fol. 43[b]

(text) कर्णानंदोर्थकौमुद्यभिधसुरसभट्टीकया संयुतोयं
कृष्णाष्टम्यां शकाब्दे गगनगगनबाणेंदुसंख्ये व्यतीते ।
श्रीराधावल्लभां ह्य(?)बुरुहपरिसरे ग्रंथ आविर्बभूव
श्रीवृंदाकानने तद्रसतृषितमतेः श्रीमतः कृष्णदासात ॥ १९० ॥
कर्णानन्दाभिधो ग्रंथः कृष्णदासेन निर्म्मितः । तट्टीका च तदा

comm. श्रीमतः विद्याविनयादिगुणसंपद्युक्तस्य पुनः कीदृशात् तद्रसतृषितमतेः तद्रसे श्रीराधावल्लभरसे श्रीललितादिराधाप्रियसखीभोग्ये तृषिता तृष्णा-युक्ता मतिर्बुद्धिर्यस्य तस्मात् ॥ कर्णानंदाभिधो कृष्णदासेन निर्मितः ति(त)-ट्टीका च तदारब्धा श्रीप्रबोधेन पूरिता ॥ छ ॥ इति श्रीकर्णानंदः स्तवः समाप्तः ॥ कृष्णराम रामकृष्ण ॥

Aufrecht— Cat. Cat. i, 82[a]; ii, 15[b].

कर्णानन्द	Karṇānanda
with	with
व्याख्या	Commentary
No. 50	28. / 1881-82.

Size.— 10 in. by $4\frac{5}{8}$ in.

Extent.— 97 leaves ; 9–10 lines to a page , 32 letters to a line.

Description.— Country paper , Devanāgarī characters ; old in appearance ; hand-writing clear and legible but somewhat careless ; text in the middle of folios and the commentary above and below it ; borders in double black lines carelessly ruled ; complete.

Age.— Samvat 1634 (= A. D. 1578) date of compsition.

Author.— (text) Krṣnadāsa.

,, (comm) Śrīprabodha.

Begins.— (text) fol. 1b

स्फुरद्वदनपंकजः कनककूटदेहद्युतिः
प्रशस्तसुखसंपदां निधिरपूर्वमानप्रदः ॥
सकृष्णवृषभानुजाचरणमाधुरीचञ्चुरः
सदा मधुरवाक्पटुर्जयति साधु वैयासकिः ॥ १ ॥ etc.

Begins (comm.)— fol. 1b

॥ श्रीगणेशाय नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीराधावल्लभाय नमः ॥

यच्छ्रद्धालवललितं हृदयं जानाति तत्वमक्लिष्टं ॥
तस्य हरेः पदकमलं वंदे तारोदराब्धिरत्नस्य ॥ १ ॥
फलिताक्षरसंभासा कृष्णकीर्त्तिविधुश्रिता ॥
बोधचक्षुः प्रसादस्य हेतुरेषार्थकौमुदी ॥ २ ॥
मिताक्षरार्थगंभीरा धीरांतर्मोददायिनी ॥
व्याकृतिरस्तन्यते श्रीमत्कर्णानंदप्रकाशिनी ॥ ३ ॥

श्रीमंत कृष्णकेलिवर्णनवृतोत्साहस्तदंतः प्रकाशमेहेतुं वे(?)कभगवंतं प्रायश मंगलमाचरति ॥ स्फुरदिति ॥ etc.

Ends.— (text) fol. 96[a]

श्रीकृष्णेति प्रणयपराणांतद्गाथाभिः सफलितवाचां ॥
माद्दग्दीनोद्धरणवलानां ॥ कर्णानंदो विशतु सभायां ॥ १८९ ॥
कर्णानंदोर्थकौमुद्यभिधसुरसभृट्टीकया संयुतोयंऽ
कृष्णाष्टम्यां शकाब्दे गगनगगनबा(णे)दु संख्ये व्यतीते ॥
श्रीराधावल्लभां ह्यंबुरुहपरिसरे ग्रंथ आविर्बभूव
श्रीवृंदाकानने'' '''द्रसतृषितमतेः श्रीमतः कृष्णदासात् ॥ १९० ॥

Ends (comm.)— fol. 97[a]

अयं कर्णानंदः कर्णानंदाख्यो ग्रंथः कृष्णदासात् सकाशात् आविर्बभूव प्रकटोजातः। कीदृशो ग्रंथः अर्थानां वामुदी चंद्रिका तद्वत्प्रकाशि अर्थकौमुदी सा अभिधा नाम यस्याः सा अर्थकौमुद्यभिधाशोभनं रसं बिभर्त्ति पुष्णाति सुरसभृत्। अर्थकौमुद्यभिधा चासौ सुरसभृच्च तादृशी या टीका तया संयुतः सहित । कदा प्रकटकः। कृष्णाष्टम्यां । कस्मिन् वर्षे । गगनं बिंदुः गगनं बिंदुः बाणः पंच इंदुश्चंद्र एकं तत्संख्ये शकाब्दे शकनरपतेः संवत्सरे व्यतीतेऽतिक्रांते सति । अंकानां वामगत्या । पंचदशशतानि भवति । कुत्र स्थले प्रकटः। वृंदाकानने । तत्रापि कुत्र प्रदेशे । श्रीराधावल्लभस्य श्रीहरिवंशेष्टत्वेन प्रसिद्धः श्रीमूर्त्तेः अह्यंबुरूहस्य पादपद्मस्य परिसरे सनिधौ । कृष्णदासात् । कीदृशात् । श्रीमत' विद्याविनयादिगुणसंपद्युक्तस्य । पुनः कीदृशात् । तद्रसतृषितमतेः तद्रसे श्रीराधावल्लभरसे श्रीललितादिराधाप्रियसखीभोग्ये तृषिता तृष्णायुक्ता मतिर्बुद्धिर्यस्य तस्मात् ॥

कर्णानंदाभिधो ग्रंथः **कृष्णदासेन** निर्मितः ।
तट्टीका च तदारब्धा **श्रीप्रबोधेन** चरिता ॥ १९० ॥

संवत् १६३४ वर्षे । शाके १५०० वर्त्तमाने कृष्णजन्माष्टम्यां श्रीकर्णानंदाख्यो ग्रंथष्टीका सहितः श्रीमतः कृष्णदासात् आविर्बभूव ॥ समाप्त इत्यर्थः ॥ छ ॥ शुभं भवतु ॥ ॥ कल्याणमस्तु ॥

संवत् १८३७ वर्षे वैशाखमासे कृष्णपक्षे अमावास्या बुधे भट्टप्राणनाथात्मजहरिनारायणेन आत्मपठनार्थं वा परोपकाराय लिखितोयं ग्रंथः ॥ ॥ श्रीरस्तु कल्याणमस्तु ॥ ॥ लेखकपाठकयोः शुभं ॥ अंबिका जयतु ॥ सर्वोत्कर्षेण वर्त्तते ॥ ५ ॥

कर्णामृत

or

कृष्णकर्णामृत

Karṇāmṛta

or

Kṛṣṇakarṇāmṛta

No. 51

430.
1884-87

Size.— $8\frac{1}{5}$ in. by 4 in.

Extent — 36 leaves, 9 lines to a page, 30 letters to a line.

Description.— Country paper; white in appearance, Devanagari characters; hand-writing clear, legible and uniform; borders of folios 1ᵃ, 2ᵇ, 3ᵇ and 4ᵃ ruled; yellow pigment used for corrections; folios numbered in both the margins.

Age.— Śaka 1756.

Author.— Līlāśuka or Bilvamaṅgala.

Begins.— fol. 1ᵇ

श्रीगणेशाय नमः अथ लीलाशुककृतकर्णामृतारंभ· ॥

चिंतामणिर्जयति सोमगिरिर्गुरुर्मे शिक्षागुरुश्च भगवान् शिखिपिछमौलिः ॥

यत्पादकल्पतरुपल्लवशेखरेषु लीलास्वयंवररसं लभते जयश्रीः ॥ १ ॥

अस्ति स्वस्तरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं

वस्तु प्रस्तुतवेणुनादलहरी निर्वाणनिर्व्याकुलं ॥

स्रस्रस्रस्त निरुत्धनीविविलसद्गोपीसहस्रावृतं

हस्तन्यस्त न तापवर्गमखिलो दारं किशोराकृति ॥ २ ॥ etc.

folio 12ᵃ ᵇ इति श्रीकृष्णकर्णामृते लीलाशुकविरचिते प्रथमशतकं समाप्तं ॥

folio 24ᵃ इति श्रीकर्णामृते द्वितीयोऽध्यायः समाप्तः ॥

Ends.— fol. 35ᵇ

कृष्णाय यादवेंद्राय ज्ञानमुद्राय योगिने ॥

नाथाय रुक्मिणीशाय नमो वेदांतवेदिने ॥ ८ ॥

कृष्णाय वासुदेवाय हरये परमात्मने ॥

प्रणतक्लेशनाशाय गोविंदाय नमो नमः ॥ ९ ॥

इति श्रीलीलाशुकविरचिते कर्णामृते तृतीयोऽध्यायः समाप्तः ॥ शाके १७५६ जयनामसंवत्से(त्सरे)पौषमासे शुक्लपक्षे नवम्यां बुधे यामद्वये समाप्तमिदं काव्यं ॥ श्रीकृष्णार्पणमस्तु

सच्चित्सुखपदाधारः ब्रह्मानंदसुनिर्वृत ॥
कृष्णकर्णामृतं स्वीयं सुखावाप्त्यै समालिखत ॥ १ ॥
श्रीमद्राधाविनोदकारिणे नमो नमः ॥ श्रीब्रह्मानंदपदाभ्यां नमः ॥

References.— 1 Aufrecht's Catalogus Catalogorum i 82ª, 119ª, ii 24ª, 105ª, iii, 26ª.

2 Winternitz— *History of Indian Literature* Vol. III p. 124

3 A. B. Keith— *History of Sanskrit Literature* pp. 218-19

4 H. D. Velankar—B.B.R.A.S. Mss. Catalogue ii, 334

Mr. Seshagiri Shastri makes the following remarks about the work and the author in his Report of 1893-94, p. 57 " The work was written by Bilvamangala who was latterly called also Līlāśuka, and contains three parts, each consisting of one hundred and odd stanzas. The work is written in praise of god Kṛṣṇa whose devotee the author was ......He then went to a yati named Somagiri whose disciple he became and who taught him a mantra of the god Kṛṣna......Līlāśuka lived before Jayadeva "

He gives a long legend in his account about Lilaśuka which is corroborated by a long saṁskrit passage by Aufrecht from a commentary on Karnamṛta in his Catalagi Codicum Manuscriptorum, Bodleianae p. 128, No.231

The work is described in the I. O. Cat. pt. VII Nos. 3900-03.

कर्णामृत
and
अन्यानि सुभाषितानि

Karṇamṛta
and
other Subhāṣitas

No. 52

147.
1902-07.

Size.— 5⅕ in. by 8 in.

Extent.— 46 leaves ; 26 lines to a page ; 20 letters to a line.
18-22 „ „ „ „ 15 „ „ „ „

Description.— Countiy papei ; old in appeaiance ; Devanāgarī characters ; hand-wiitıng beautiful, clear and legible but not uniform ; 1st pait i. e. folios 1–6 have a yellowish appearance ; slightly moth-eaten folio No. 40 blank.

The Ms divided as follows—

folios	1–6	1st Śataka—	1st part
,,	1–23	2nd and 3rd Śatakas	2nd part.
,,	24–39	other Subhāsitas	

The Ms. contains several subhāsitas taken from other works besides कर्णामृत. The arrangement of the śatakas is 1st, 3rd and 2nd.

Age.— The Ms. appears to be old.

Authoi of Karnāmrta.— Lılāśuka, also called Bilvamaṅgala.

Begins.— fol. 1[b]

श्रीगजाननो जयति ॥

चिंतामणिर्जयति etc. as in No. 51

folio 6[b] इति श्रीलीलाशुककृते लीलामृते प्रथमशतकं समाप्तं ॥ छ ॥ छ॥

folio 12[a] of the 3rd शतक

इति श्रीलीलाशुकविरचिते कर्णामृते तृतीयशतकं समाप्तं ॥

कर्णामृत Ends.— fol. 24[a]

कालिंदीबहुलप्रावाहरभसं संस्तंभयन् तत्क्षणा-

च्छैलान्विद्रवयन्मृगान्विवशयन् गोवृंदमानंदयन् ॥

गोपान्संभ्रमयन् मुनीन्मुकुलयन् सप्तस्वरान् जृंभय-

न्नोकारार्थमुदीरयन्विजयते वंशी निनादः शिशोः ॥ १० ॥

इति श्रीलीलाशुकविरचिते कर्णामृते द्वितीयशतकं समाप्तं छ छ

Then follow some Subhāṣitās—

folio 24[a] केचित् शार्ङ्गधरीयाः श्लोकाः लिख्यंते अथ नमस्कृतिः

चलत्कर्णानिलोद्भूतसिंदूरारुणितांबरः ॥

जयत्यकाले विसृजत्संध्यामिव गजाननः ॥ १॥

अविरलविगलन्मदजलकपोलपालीनिलीनमधुपकुलः ॥

उद्भिन्ननवश्मश्रुश्रेणिरिव गणाधिपो जयति ॥ २ ॥ etc.

Subhāsitās end on folio 39[b]

संधिगुतं नममागोरसाभिज्ञं चेतः कस्मात्प्रकुप्यसि ॥
अस्थानरुदितैरेभिरलमालोहिते क्षणे ॥ ५ ॥
अथ बिंदुमति त्रिनयनचूडारलंसिधोकुमुद्वती दायितः ॥
अयमुदयति घुसृणारुणरमणीवदनोपमश्चंद्रः ॥ ६ ॥
डिठठठ etc.

References.—For कृष्णकर्णामृत See No. 51

कृष्णकर्णामृत Krsnakarnāmrta*

No. 53 477. 1891–95.

Size.— 10¾ in by 4¼ in.

Extent.— 7 leaves ; 10 lines to a page ; 42 letters to a line.

Description.— Country paper ; *Bengālī* characters ; old in appearance ; hand-writing small but clear, legible and uniform ; yellow pigment used for corrections ; borders in double (sometimes triple) black lines , fol. 7 missing.

Age.— Appears to be fairly old.

Author.— Līlāśuka.

Begins.—fol. 1[b]

श्रीराधाकृष्णौ जयतः ॥
चिन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिच्छमौलिः ॥
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥१ ॥
अस्ति स्वरतरुणीकराग्रविगलत्कल्पप्रसूनाप्लुतं
वस्तु प्रस्तुतवेणुनादलहरीनिर्वाणनिर्व्याकुलम् ।

*A Ms (No. $\frac{478}{1891-95}$) of this work which contains a Bengālī version is transferred to the Vernacular section.

स्रस्तस्रस्तनिरुद्धनीविविगलद्गोपीसहस्रावृतं
हस्तन्यस्तनतापवर्गमखिलोदारं किशोराकृति ॥ २ ॥
आलिंग्य राधां व्रजसुभ्रुवाङ्गना-
न्द्यङ्गया तया गूढविलासलोभतः ।
कुञ्जे रसास्वादविशेषलब्धये
प्रारम्भि रासो रसिकेन्द्रमौलिना ॥ ३ ॥

Ends.— fol. 8[a]

ईशानदेवचरणाभरणेन नीवी
दामोदरस्थिरयशस्तबकोद्भवेन ॥
लीलाशुकेन रचितं तव कृष्णदेव
कर्णामृतं वहतु कल्पशतान्तरेऽपि ॥ ११ ॥
धन्यानां सरसानुलापलहरी सौरभ्यमभ्यस्यतां
कर्णानां विवरेषु कामपि सुधावृष्टिं सुहानं सुहुः ।
वन्यानां सुदृशां मनोनयनोर्भिग्रस्य देवस्य न·
कर्णानां वचसां विजृम्भितमहो कृष्णस्य कर्णामृतम् ॥ ११२ ॥
अनुग्रहद्विगुणविशाललोचनै-
रनुस्मरन्मृदुमुरलीरवामृतैः ।
यतो यतः प्रसरति मे विलोचनः
ततस्ततः स्फुरतु तवैव वैभवम् ॥ ११३ ॥
॥ इति श्रीकृष्णकर्णामृतं ॥

References:— See No. 51

कृष्णकर्णामृत Kṛṣṇakarnāmṛta

No. 54 566. / Viśrāma (i)

Size.— 6 in. by 4 in.

Extent.— 26 leaves ; 7 lines to a page ; 22 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; white in appearance ; hand-writing clear, legible and uniform ; borders of some folios ruled in double red lines ; the Ms contains the 1st śataka.

Begins.—fol. 1[a]

॥ श्रीगणाधिपतये नमः ॥ शुभमस्तु

चिंतामणिर्जयति etc. as in No. 56 below

Ends.—fol. 25[b]

धन्याना etc. up to स्फुरतु तवैव वैभवं ॥ ११२ ॥

followed by इति श्रीलीलाशुकविरचिते कर्णामृते प्रथमशतकं समाप्तं श्रीकृष्णार्पणमस्तु । शके

References— See No. 51

कृष्णकर्णामृत Krsnakarnāmrta

No. 55 627. / 1883-84.

Size.— $12\frac{1}{5}$ in. by $4\frac{1}{6}$ in.

Extent.— 9 leaves; 18-19 lines to a page; 48-52 letters to a line.

Description.— Modern paper with water-marks; Devanāgarī characters; hand-writing very closely and carelessly written; some folios have become dirty probably by oil spots; borders ruled in double black lines.

The present Ms. and the Ms. No. $\frac{628}{1883\text{-}84}$ appear to have been written by the same scribe. The name of the scribe is Dinanātha as given in the present Ms.

Age.— A modern copy.

Author.— Līlāśuka.

Begins.— fol 1[a]

श्रीगुरुगणपति इष्टदेवताभ्यो नमः ॥

चिंतामणिर्जयति etc. as in No. 56 below.

Ends.— fol. 9[b]

जयतु न २ देवो देवकीनंदनो सौ ज. २ कृष्णो वृष्णिवंशप्रदीपः ॥ ज.२ मेघः श्यामलः कोमलांगो ज. २ पृथ्वीभारं नाशो मुकुंदः ॥ ११२ ॥

इति लीलाशुकविरचिते श्रीकृष्णकरुणा(र्णा)मृते तृतीयोल्लासः समाप्तः ॥ दीननाथेन लिखितमिदं स्वार्थपरार्थं च ॥ लेखकपाठकयोः शमस्तु ॥ छ ॥

References.— See No. 51

कृष्णकर्णामृत Kṛṣṇakarṇāmṛta

No. 56 628. / 1883-84.

Size.— 12 in. by $4\frac{1}{6}$ in.

Extent.— 12 leaves, 18–19 lines to a page; 48 letters to a line.

Description.— Modern paper with water-marks, Devanagarī characters; hand-writing small and legible but very closely written, text bounded on either sides by double black lines, red pigment scarcely used; complete.

Age.— A modern copy.

Author.— Līlāśuka or Bilvamangala.

Begins.— fol. 1[a]

श्रीगणेशाय नमः ॥
चिंन्तामणिर्जयति सोमगिरिर्गुरुर्मे
शिक्षागुरुश्च भगवान् शिखिपिच्छमौलिः ॥
यत्पादकल्पतरुपल्लवशेखरेषु
लीलास्वयंवररसं लभते जयश्रीः ॥ १ ॥

Ends.— fol. 9[a]

धन्यानां सरसानुलापसरणे सौरभ्यमभ्यस्यतां
कर्णानां विवरे तु कामपि सुधावृष्टिं दुहान मुहुः ॥
धन्यानां पिबतां मनोनयनयोर्मग्नस्य देवस्य नः
कर्णानां वचसां विजृंभितमहो कृष्णं स्वकर्णामृतम् ॥ १०७ ॥
अनुग्रहाद्विगुण विशाललोचनैरुस्मितं मृदुमुरलीरवामृतैः ॥
यतस्ततः प्रसरति मे विलोचने तेन तत्स्फुरतु तवैव वैभव ॥ १०८ ॥

इति लीलाशुकविरचितं कर्णामृतस्य तृतीयशतकं समाप्तम् ॥ श्रीगोपाळकृष्णार्पणमस्तु ॥ छ ॥ लेखकपाठकयोः शमस्तु ॥ छ ॥

Then follow a number of verses which narrate the duties of a Brahmin.

प्रातरुत्थाय कर्त्तव्यं यद्द्विजेन दिने ॥ २ ॥
तदहं संप्रवक्ष्यामि द्विजानामुपकारकं ॥ etc.

References.— See No. 51

कृष्णकर्णामृत **Kṛṣṇakarṇāmṛta**

No. 57 334. 1892-95.

Size.— $7\frac{1}{4}$ in. by $4\frac{1}{6}$ in.

Extent.— 15 leaves; 8-9 lines to a page; 25 letters to a line.

Description.— Country paper; Devanagari characters; old in appearance; hand-writing legible but carelessly written; borders ruled in double black lines; contains only the 1st śataka (?)

Age.— Saṁvat 1766

Author.— Līlāśuka.

Begins.— fol. 1^b

श्रीकृष्णाय नमः ॥
चिंतामणिर्ज्जयति etc. as in No. 56

Ends.— fol. 15^a

धन्यानां etc. up to स्फुरतु तवैव वैभवः ॥ १२ ॥
followed by इति श्रीबिल्वमंगलाविरचितं श्रीकृष्णकर्णामृतं स्तोत्रं संपूर्णं ॥ शुभमस्तु ॥ संवत् १७६६ ॥

References.— See No. 51

कर्णामृत ? Karnāmrta

No. 58 491. / 1887-91.

Size.— $9\frac{1}{5}$ in. by $4\frac{1}{4}$ in.

Extent.— 14 leaves ; 14-15 lines to a page , 32 letters to a line.

Description.— Country paper , old in appearance ; Devanāgarī characters , hand-writing small but clear and legible , borders of folios 1-9 ruled in double black lines and borders of folios 10-14 not ruled; folios 13 and 14 slightly damaged

The Ms. is incomplete and contains 149 stanzas. It is doubtful whether this कर्णामृत is the same as that of Līlā-śuka.

Age.— The Ms. appears to be old.

Author.— Līlāśuka or Bilvamangala ?

Begins.— fol. 1[b]

॥ श्रीमद्विघ्नवल्लीविध्वंसकगणेशाय नमः ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥
इंदीवरदलशामाय नमः ॥

स्वभक्तरक्षैकपरं कृपालुं यदोः कुलांभोधिसुधामयूखं ॥
श्रीकृष्णमानम्य करोमि काव्यं कर्णामृतं पुण्यकथाविलासं ॥ १ ॥

लीलाजनोस्तस्य महामहामहस्वीयशस्वकीर्त्यामलकीत्ति(र्त्ति)गसीत ॥
पौत्रौ निरुद्ध स्वशरीरशोभा निरुद्धकामाखिल विक्रमः सः ॥ २ ॥ etc

Ends.— fol. 14[a]

सखि कस्य कृते विषयते विषदं ब्रूहि तमानयेद्रुतं ।
अपि नाकरसारसातलेष्विति सागयत चित्रलेखया ॥ ४८ ॥
तमुषा न शशाक भाषितुं त्रपिता च स्मरजर्जरीकृता ।
नयनांगुलिपल्लवेंगितैर्भृशमालेखितुमाह सुभ्रुजः ॥ ४९ ॥
अथ चंद्रकलाधिकंदिरे कमनीये शमनीयमंदिरे । अधिभित्तिलिलेखयो

कर्णामृत
with
श्रवणाह्लादिनी टीका

Karṇāmṛta
with
Śravaṇāhladinī ṭīkā

No. 59

178.
1879-80.

Size.— $5\frac{2}{5}$ in. by $9\frac{3}{5}$ in.

Extent.— 145 leaves, 22-24 lines to a page, 15 letters to a line.

Description.— Country paper ; old in appearance , Devanāgarī characters ; hand-writing clear and legible ; text in the middle with the comm. above and below it , borders ruled in triple red lines ; separate pagination for each *śataka* ; incomplete.

The Ms. contains the नीतिशतक and 50 stanzas of the शृंगारशतक.

Age.— The Ms. appears to be old.

Author of the text.— Bhartṛhari.

" " " comm.— Anonymous.

Begins— folio 1ᵃ

Text— दिक्कालाद्यनवच्छिन्नानंतचिन्मात्रमूर्तये ॥
स्वानुभूत्यैकसाराय नमः शांताय तेजसे ॥ १ ॥
यां चिंतयामि etc. as in No. 326

श्रीगणेशाय नमः ॥

Com.— विघ्नेशं विघ्नहर्तारं गणराजं नमाम्यहं ॥
शारदां वरदां नौमि जाड्यापनुतये तथा ॥ १ ॥
श्रीगोपाल नमस्कृत्य मत्वा गुरुपरंपरान् ॥
भर्तृहरिणा कृतो ग्रंथस्तस्य व्याख्या करोम्यहं ॥ २ ॥
॥ दिगेति ॥ दशदिशासु तथा भूतभविष्यवर्तमानत्रिकालेषु अनवछिन्ना· etc.

नीतिशतक Ends.—folio. 19ᵃ

Text— लज्जागुणौघजननीं जननीमिव स्वाम् ।
अन्यं न शुद्धहृदयामनुवर्त्तमानां ॥
तेजस्विनः सुखमसूनपि संत्यजंति ।
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञां ॥ १०८ ॥
इति भर्तृहरिकृतं नीतिशतकं समाप्तमगमत् श्रीजगदंबार्पणमस्तु ॐ

com.— स्वां स्वकीयां जननीमिव अत्यंतशुद्धहृदयामनुवर्त्तमानां अनुकरोति अत· तेजस्विनः सुखमसून् प्राणान् अपि त्यजंति १०८ इति भर्तृहरिणा कृतं नीतिशतक समाप्तमगमत् श्रीजगदंबाप्रसन्ना मामस्तु छ

शृंगारशतक Begins.— folio 1ᵃ

॥ श्रीगणेशाय नमः ॥

Text— शंभुः स्वयंभुहरयो हरिणेक्षणानां ।
येनाक्रियंत सततं गतकर्मदासाः ॥
वाचामगोचरचरित्रविचित्रिताय ।
तस्मै नमो भगवते कुसुमायुधाय ॥ १ ॥ etc.

Com.— श्रीगणेशाय नमः अथ शृंगारशतक प्रारंभः परंतु नाम्ना सम्यग् विचारितं चेत्परिणामे वैराग्यमेवास्ति निंदास्तुतिः etc.

शृंगारशतक Ends.—folio. 28ᵃ

Text— केशानाकलयन् दृशो मुकुलयन् वासो बलादाक्षियन् ।
अतन्वन् पुलकोद्गमं प्रकटयन्नाश्लिंग्य कंपं शनैः ॥
वारंवारमुदारसीत्कृतकृतोदंतच्छदान् पीडयन् ।
प्रायः शैशिर एष संप्रति मरुत्कांता सुकांतायते ॥ ५० ॥

com.— अथ शैशिरः संप्रति इदानीं कांतासु स्त्रीषु कांतायते कांतामिव भवति तत्कथं केशानाकलयन् दृशः दृष्टीः मुकुलयन् अच्छादयन् वासः वस्त्रं बलादाक्षिपद्भिः का ... ...

नीति and शृंगार शतकs with टीका

No. 338

Niti and Srngara Satakas with Commentary

133.
1866-68.

Size.—12½ in. by 7½ in.

Extent.— 42 leaves; 11 lines to a page, 32 letters to a line.

Description — Modern paper with water-marks; bluish in appearance; Devanāgarī characters; hand-writing bold, clear and uniform; a bound copy.

The Ms. is a copy of a Ms. written in Śaka 1693.

Age.— A modern copy.

Author of the text.— Bhartrhari.

" " " comm.— Anonymous.

नीतिशतक Begins.— folio 1[a]

Text— दिक्कालाद्यनवच्छिन्न etc. as in No. 326

followed by यां चिंतयामि etc. as in No. 337

Com.— ॥ श्रीगणेशाय नमः ॥ श्रीसांबमूर्तये नमः ॥

विघ्नेशं विघ्नहर्तारं etc. as in No. 337

followed by दिगेति ॥ दशदिशासु तथा भूतभविष्यवर्तमानात्रिकालेषु च अनवच्छिन्नः अतएव अनंतः etc.

नीतिशतक Ends.— folio 21[b]

Text— लज्जागुणौघ etc. as in No. 337

Com.— स्वां स्वकीयां जननीमिव अत्यंतशुद्धहृदयामनुवर्तमानामनुकरोति ॥ अतस्तेजःस्विनः सुखमसून् प्राणानपि त्यजंति ॥ ११० ॥ इति श्रीभर्तृहरिविरचितं नीतिशतकं समाप्तं ॥

शृंगारशतक Begins.— folio 22[a]

॥ श्रीमत्सांबाय नमः ॥

Text— शंभुस्वयंभु etc as in No. 337

Com.— अथ शृंगारशतं etc.

शृंगारशतक Ends.—folio 42[b]

Text— यद्यस्य नास्ति etc. as in No. 327

Com.— तासां कामिनीनां प्रशंसा कामिभिः क्रियते सा लिखिता प्रांते सर्वं विवेकदृष्ट्या निंदितं ॥ इति भर्तृहरिणा विरचितं श्रृंगारश(त)कं सटीकं समाप्तं ॥ शके १६९३ खरेब्दे बाहुले पंचदश्यां १५ शुक्रे इद पुस्तकं समाप्तं ॥

References.— See No. 326

नीतिशतक
with
टीका

Nītiśataka
with
Commentary

No. 339

337.
1895-98.

Size.— $8\frac{1}{4}$ in. by $4\frac{3}{8}$ in.

Extent.— 20 leaves ; 6 lines to a page ; 25 letters to a line (text).
6 ,, ,, ,, ,, 35 ,, ,, ,, ,, (comm.).

Description.— Country paper, Devanāgarī characters ; hand-writing clear and legible but some what careless ; text in bold-hand and commentary in small hand written between lines of the text ; borders ruled in triple red lines ; colophon in red ink.

Age.— Saṁvat 1853 (= A. D. 1797).

Author of the text.— Bhartṛhari.

Begins.— fol. 1[b]

॥ श्रीगणेशाय नमः ॥ श्रीस्वस्तिये नमः॥ अथ राजस्तं लिषत्तं ॥

Text— यां चिंतयामि सततं etc. as in No. 326

Com.— पुरा कदाचित् उज्जयिन्यां नगर्यां भर्तृहरिभूपतिरामंडली आसीत् तत्र विप्र एक देवीं आराध्य अमरफलं प्राप्य राजानं आगत्य फलं रतं स राजा प्रियायै ददौ etc.

Ends.— fol. 20[b]

Text— दूरादर्थं घटयति नवं दूरतश्चापशब्दं ।
त्यक्ताभूयो भवति निरतः सत्सभापादनेषु ॥
मंदं मंदं रचयति पदं लोकाचितानुवृत्या ।
कामं मंत्री कविरिह सदावैदभारैरमुक्तः ॥ १०१ ॥
इति श्रीराजसुत्त संपूर्णं ॥ लिषितं डगीमध्ये जादुराम ब्रामण ॥ मिति आसोजमासे कृष्णपक्ष १० संवत् १८५३ का ॥ ॐ नमो भगवते वासुदेवाय ॥ रामंरामरां ॥

Com.— समयसंयुत भवती एतत् षेदभारसुसब्दभवती स तदा आनंदयुक्त-स्यात् ॥ १०१ ॥

References.— See No. 326

नीतिशतक	Nitiśataka
with	with
टीका	Commentary
No. 340	512. 1891–95.

Size.— 12¾ in. by 4⅘ in.

Extent.— 17 leaves ; 8–9 lines to a page ; 50 letters to a line.

Description.— Country paper ; smooth ; Devanāgarī characters ; hand-writing clear, legible and uniform ; yellow pigment used for corrections ; folios numbered in both margins ; a tripāthī Ms. having text in the middle and the comm. above and below it.

Age.— Saṁvat 1893.

Author of the text.— Bhartṛhari.

,, ,, ,, Comm.— Anonymous.

Begins.— folio 1

श्रीरामः ॥

Text — यां चिंतयामि etc. as in No. 337.

Com.— श्रीगणेशाय नमः ॥
विघ्नेशं विघ्नहर्तारं etc. as in No. 337.

Ends—folio 17b

Text— लज्जागुणौघ etc. up to प्रतिज्ञां १०१ as in No. 337 followed by इति श्रीमद्योगींद्रभर्तृहरिकृतं नीतिशतकं संपूर्णम् समाप्तमगमत् श्रीमते रामानुजाय नमः ॥

Com.— अतस्तेजस्विनः सुखमसूनपि संत्यजंति प्राणानपि संत्यजंति प्रतिज्ञां न त्यजंति १०१ इति श्रीयोगींद्रभर्तृहरिकृते नीतिशतकटीकायां नीतिशतक व्याख्यानं समाप्तम् शुभमस्तु श्रीरस्तु संवत् १८१३ कार्तिक शुक्ल १५ तद्दिने समाप्तं ॥

References.— See No. 326

नीतिशतक with टीका	Nītiśataka with Commentary
No 341	131. 1866-68.

Size.— 12½ in. by 3¾ in.

Extent.— 16 leaves ; 9 lines to a page ; 55 letters to a line.

Description.— Modern paper with water-marks ; bluish in colour ; Devanāgarī characters ; hand-writing clear, legible and uniform ; folios numbered in both margins ; yellow pigment used for corrections.

The Ms. is a bound copy written by one Raghunātha Pāḍaḷkar.

Age.— A modern copy.

Author of the text.— Bhartṛhari.

" " " Comm.— Anonymous.

Begins.— folio 1b

श्रीगणेशाय नमः ॥

Text— दिक्कालाद्यनवच्छिन्न etc. as in No. 326

Com.— विघ्नेशं विघ्नहर्तारं etc, as in No. 337

Ends.—folio 15^b (16^a)

Text— लज्जागुणौघ etc. as in No. 337

Com.— स्वां स्वकीयां अत्यंत शुद्धहृदयां जननीमिव अनुवर्तमानां अनुकुर्वतीं अतः तेजस्विनः प्रतिज्ञार्थे सुखेन प्राणानपि त्यजंति ११०
इति भर्तृहरिविरचितायां नीतिशतक संपूर्णम् ॥
पाडळकरेत्युपनामक रघुनाथ शिंपी उर्फ नामदेवेन लिखितम् ग्रंथसख्या ५०० इदं पुस्तकं गणेशशास्त्रिणा यथा शेङ्खपि शोधितं ॥

References.— See No. 326

नीतिशतक
with
टीका

Nītiśataka
with
Commentary

No. 312

132.
1866-68.

Size.— $7\frac{3}{5}$ in. by $3\frac{3}{4}$ in.

Extent.— 50 leaves ; 8 lines to a page ; 32 letters to a line.

Description.— Modern paper with water-marks ; Devanāgarī characters ; hand-writing very beautiful and uniform ; borders ruled in triple red lines ; yellow pigment used for corrections ; folios numbered in both margins ; a bound copy.
The Ms. was copied by one Mahadev Viśwanātha Sathe in Śaka 1789 i. e. A. D. 1867.

Age.— Śaka 1789.

Author of the text.— Bhartṛhari.

" " " comm.— Anonymous.

Begins.—folio. 1^b

Text— दिक्कालाद्यनवछिन्न etc. as in No. 326

Com.-- ॥ श्रीगणेशाय नमः ॥ भर्तृहरिनीतिशतकलेखने प्रारंभः.
विघ्नेशं विघ्नहर्तारं etc. as in No. 337

Ends.— folio. 50^b

Text-- परिचरितव्याः संतो यद्यप्युपदिशंति नयस्तेषां ।
स्वैरकथास्ता एव भवंति शास्त्राणि ॥ १०६ ॥

Com.-- सतां सदा परिचर्या सेवा कर्त्तव्या यर्हि ते उपदेशं न कुर्वंति तथापि तेषां परस्परं याः स्वैरकथा' वक्तव्यानि तान्येव शास्त्राणि उपदेशा भवंति १०६ इति श्रीभर्तृहरिकृतौ प्रथम नीतिशतकं समाप्तं ॥ श्रीगजाननार्पणमस्तु ॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् ।
तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥
इदं पुस्तकं साठे इत्युपनामक विश्वनाथात्मज माहादेवेन लिखितं ॥ शाके १७८९ प्रभवनामाब्दे अश्विन वद्य १२ श्यायां इदं पुस्तकं समाप्तं ॥

References.— See No. 326

शृंगार and नीति शतकs with टीका

Srṅgāra and Nīti Satakas with Commentary

No. 343

490.
1895–1902.

Size.— $10\frac{1}{4}$ in. by $4\frac{2}{5}$ in.

Extent.— 44 leaves ; 8–9 lines to a page ; 40 letters to a line.

Description.— Country paper ; Devanāgarī characters ; handwriting clear and legible ; many folios moth-eaten ; this is a त्रिपाठी Ms., separate pagination for each śataka.

Age.— Saṁvat 1900.

Author of the text.— Bhartṛhari.

,, ,, ,, comm.— Not mentioned.

शृंगारशतक Begins.-- folio 1^b

Text— शंभुः स्वयंभु etc. as in No. 337

Com.— श्रीगणेशाय नमः अथ शृंगारशतं परंतु सम्यग्विचारितं चेत्‌ (प)रिणामे वैराग्यमेवास्ति etc.

शृंगारशतक Ends.—folio 23[b]

धन्यास्ते वीतरागा गुरुचरणरता त्यक्तसंसारसंगा ।
ब्रह्मज्ञाने विलीना गिरिवरगहने यौवने येनयंते ॥
येपि प्रोत्तुंगपीनस्तनकलशभरात्कांतकायाः दिनांते ।
कांतामालिंग्य गाढे मृदुशयनतले शेरतं तेपि धन्याः ॥ १०१ ॥

Com.— तासां कामिनीनां प्रशंसा कामिभिः क्रियते सा लि(खि)ता प्रांते सर्वं विवेकदृष्ट्या निंदितं १०१ इति भर्तृहरिणा विरचितं श्रृंगारशतकं संपूर्णं शुभमस्तु ॥

नीतिशतक Begins.— folio. 1[a]

॥ श्रीगणेशाय नमः ॥
दिक्कालाद्यनवच्छिन्न etc. as in No. 326

followed by यां चिंतयामि etc. as in No. 326

Com.— श्रीगणेशाय नमः
विघ्नेशं विघ्नहर्तारं etc. as in No. 337

Ends.— folio. 23[b]

Text— लज्जागुणौघ etc. up to प्रतिज्ञां as in No. 337
followed by इति भर्तृहरीविरचितं नीतिशतकं संपूर्णम् संवत् १९०० श्रा॰ ल॰ मी॰ अ॰

Com.— तेजस्विनः सुखमसून्‌ प्राणानपि त्यजंति ११०
इति श्रीभर्तृहरिविरचितं सटीकनीतिशतकं समाप्तं श्रीरामचंद्राय ॥

References.— See No. 326

—— ——

शृंगार and वैराग्यशतकs
with
टीका

Sṛṅgāra and Vairāgyaśatakas
with
Commentary

No. 344

56.
1898–99.

Size.— 11 in. by 5 in.

Extent.— 36 leaves; 12 lines to a page; 30–32 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing, bold clear and legible; borders ruled in two double red and black lines; text in the middle with the comm. above and below it; separate pagination for each śataka.

Age.— The Ms. appears to be old.

Author of the text.— Bhartrhari.

,, ,, ,, comm.— Not mentioned.

Begins.—folio. 1[b]

Text— शंभु स्वयंभु etc. as in No. 337

Com.— श्रीगणेशाय नमः ॥ इदं शृंगारशतकं ॥ परंतु नाम्ना सम्यक् विचारितं चेत् परिणामे वैराग्यमेवास्ति ॥ etc.

शृंगारशतक Ends.— folio 20[a]

Text— यदस्य नास्ति etc. up to सरोजिन्याः as in No. 327
followed by इति भर्तृहरिणा कृतं शृंगाररसवर्णनं श्रृंगारशतकं समाप्ति-मगमत् ॥ शुभं भवतु ॥

Com.— तासां कामिनीनां प्रशंसा कामिभिः क्रियते सा लिखितं प्रांते सर्वे विवेकदृष्ट्वा निंदितं ॥ १०० ॥ इति भर्तृविरचितं टिकायां श्रृंगारशतं समाप्तं ॥ छ ॥ छ ॥

वैराग्यशतक Begins.—folio 1[a]

Text— चूडोत्तंसित etc, as in No. 326

Com.— ॥ श्रीगणेशाय नमः ॥ योगिनां चेतः मन एव सद्मनि गृहे ज्ञानमेव प्रकर्षेण दीपो यस्य स एवं भूतो हरः शंकरः विजयते etc.

वैराग्यशतक Ends.—folio. 16[b]

Text— भूपर्येको etc. up to सर्वस्पृहोपि as in No. 336
followed by इति भर्तृहरिणा कृतं वैराग्यशतं समाप्तं ॥ श्रीरस्तु

com.— एवं एस्य वैराग्येण सामग्री तस्य त्रैलोक्यराज्येन किं ॥ ८६ ॥
इति भर्तृहरिणा विरचितं टिकायां समाप्तं ॥ समाप्तोयं भर्तृहरिग्रंथः ॥

References.— See No. 326

शृंगारशतक
with
टीका

Śṛṅgāraśataka
with
Commentary

No. 345

588.
1891-95.

Size.— $8\frac{3}{4}$ in. by $4\frac{1}{2}$ in.

Extent.— 22 leaves; 11-12 lines to a page, 32 letters to a line.

Description.— Country paper; Devanāgarī characters, hand-writing clear and legible, borders ruled in double red lines, text in the middle with the comm. above and below it; red pigment used for verse-numbers.

Age.— The Ms. is not very old.

Author of the text.— Bhartṛhari.

,, ,, ,, comm.— Not mentioned.

Begins.—folio. 1[b]

श्रीगणेशाय नमः

Text— शंभुः स्वयंभु etc. as in No. 337.

Com.— श्रीगणेशाय नमः ॥ अथ श्रृंगारशतं परंतु नाम्ना सम्यग्विचारितं चेत्परिणामे वैराग्यमेवास्ति ॥ etc..

Ends.—folio. 22[a]

Text— यद्यस्य नास्ति रुचितं etc. up to सरोजिन्याः as in No. 327 followed by इति भर्तृहरिणा विरचितं श्रृगारशतक समाप्तं

Com.— तासां कामिनीनां प्रशंसा कामिभिः क्रियते सा लिखिता प्रांते सर्वे विवेकदृष्ट्या निंदितं

References.— See No. 326

वैराग्यशतक
with
टीका

Vairāgyaśataka
with
Commentary

No. 346

155.
1866-68.

Size.— 7¾ in. by 3¼ in.

Extent.— 44 leaves, 8 lines to a page; 32 letters to a line.

Description — Modern paper with water-marks, Devanāgarī characters, hand-writing beautiful, clear and uniform; borders ruled in triple red lines; a bound copy; yellow pigment occasionally used for corrections.

Age.— A modern copy.

Author of the text.— Bhartṛhari.

" " " comm.— Not mentioned.

Begins.— folio 1ᵃ

श्रीगणेशाय नमः ॥ ॥ अथ वैराग्यशतं लिखिते ॥

Text -- चूडोत्तंसित etc. as in No. 326

Com. - योगिनां चेतः सद्मनि चेतः मन एव सद्म गृहं तस्मिन् ज्ञानमेव प्रकर्षेण दीपः एवं भूतो हरः शंकरः विजयते etc.

Ends.—folio 44ᵃ

Text — किं कंदर्पकरं कंदर्थयसिरेकोदंडटंकारितै- ।
रे रे कोकिल कोमलं कलरवं किं त्वं वृथा वलासि ॥
मुग्धे स्निग्धविदग्धमुग्धमधुरैर्लोलैः कटाक्षैरलं ।
चेतश्चुंबति चंद्रचूडचरणध्यानामृते वर्त्तते ॥ १०० ।

Com.— हे मुग्धे मूर्खे अंगने स्निग्धाः स्नेहयुक्ताः विदग्धाः सुंदराः मुग्धाः ईषत् प्रकटाः मधुराः लोलाश्चंचलाः एवं भूताः कटाक्षास्तैरलं पूर्यतां किमर्थं इत्थं तर्हि अस्माकं चेत मनः चुंबितचंद्रचूडस्य शिवचरणयोः ध्यानामृते वर्त्तते इति कारणात् आयासैरलं प्रयोजनं नास्ति ॥१०॥इति श्रीमहायोगि भर्त्तृ(र्तृ)हारिकृत वैराग्यशतं संपूर्ण ॥ श्रीगजाननार्पणमस्तु ॥

References.— See No. 326

वैराग्यशतक
with
टीका

No 347

Vairāgyaśataka
with
Commentary

580.
1891-95.

Size.— $8\frac{1}{5}$ in. by $4\frac{3}{5}$ in.

Extent.— 19 leaves; 12 lines to a page; 30 letters to a line.

Description.— Country paper; whitish in appearance, Devanagarī characters; hand-writing clear and legible, borders ruled in double red lines; text in the middle and the comm. below and above it.

The comm. is upto the 85th stanza.

Age.— The Ms. is not very old.

Author of the text.— Bhartrhari.

" " " comm.— Not mentioned.

Begins.--folio. 1[b]

Text-- चूडोत्तंसित etc. as in No. 326

Com.— श्रीगणेशाय नमः अथ वैराग्यशतकं योगिनां चेतः मन एव सद्मनि गृहे ज्ञानमेवं प्रकर्षेण दीपो यस्य एवं भूतो हरः शंकरः विज(य)ते etc.

Ends.—folio 19[b]

Text-- यूयं वयं यूयंमित्यासीन्मतिरावयोः ।
किंजातमधुना ये ते यूयं यूयं वयं वयं ९१ श्रीरामाय नमोन ॥

Com.— प्रशांतं योगमहोत्सवेपि स्थैर्यं एवं यस्य वैराग्येण सामग्री तस्य त्रैलोक्यस्य राज्येन किं ८५

References.— See No. 326

वैराग्यशतक
with
टीका

No. 348

Vairāgyaśataka
with
Commentary

494
1899-1915

Size.— 10¼ in. by 4¼ in.

Extent.— 18 leaves, 10-11 lines to a page; 40-45 letters to a line.

Description.— Country paper, old in appearance; Devanāgarī characters, hand-writing clear and legible, borders ruled in triple black lines; red pigment used for verse-numbers and yellow for corrections, slightly worm-eaten; a त्रिपाठी Ms.

Age.— The Ms. appears to be old.

Author of the text.— Bhartrhari.

„ „ „ comm.— Not mentioned.

Begins.— folio. 1b

श्रीगणेशाय नमः

Text— चूडोत्तंसित etc. as in No. 326

Com.— श्रीगणेशाय नमः ॥ अथ वैराग्यशतं योगिनां चेतः सद्मनि चेतः मन एव सद्म तस्मिन् गृहे ज्ञानमेव प्रकर्षेण दीपो य एवं भूतो हरः शंकरः विजयते etc.

Ends.—folio 18b

Text — व्याघ्रीव तिष्ठति जरापरितर्जयंती ।
(रो) गाश्च शत्रव इव प्रहरंति गात्रे ॥
आयुः परिस्रवति भिन्नघटादिवांभो ।
लोको न चात्महितमाचरतीति कष्टः ॥ ९५ ॥

Com.— व्याघ्रीवेति केशादौ विलासा जरापरितः समंतात्तर्कयंती रोगाः शात्रव इव प्रहरं(ति)प्रहारं कुर्वंति आचरतीति चित्रमिति वा पाठः ९५ एतच्छतकस्य टीकामस्ति तस्य ग्रंथसंख्या

References.— See No. 326

वैराग्यशतक
with
explanation in Gujarathi

Vairagyasataka
with
explanation in Gujarathi

No. 349

486
1895-1902.

Size.-- $10\frac{1}{6}$ in. by $4\frac{1}{5}$ in.

Extent.— 43 leaves; 8 lines to a page, 32 letters to a line.

Description.— Country paper; Devanagari characters, hand writing bold, clear, legible and uniform, borders and edges ruled in red lines.

Age.— Saṁvat 1798.

Author of the text.— Bhartrhara(-ri).

Begins.—folio. 1^b

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीसूर्याय नम ॥ श्रीगुरुवे नमः ॥ अथ वैराग्यशत लिख्यते ॥

Text-- दिक्पालाद्यनवछिन्न etc. as in No. 326

expl. एहवूंजे सर्वदा शांतस्वभावतेजतेने नमस्कार छ। ते तेज केहेवुंछे। दिशाए जे हेनो अविछेद थाए नही। जेहेनो अंत पार नथी । ज्ञानमात्र छे मूर्त्ति जेहेनी । ज्ञानैक गम्य छे । etc.

Ends.--folio. 43^a

Text-- fol 42^b शय्याशैलशिलागृहं गिरिगुहावस्त्रं तरूणां त्वचाः।
सारंगाः सुहृदो ननु क्षितिरुहां वृत्तेः फलैः कोमलैः॥
येषां निर्झरमंबुपानमुचितं रत्यै च विद्यांगना।
मन्ये ते परमेश्वराः शिरसि यैर्बद्धो न सेवांजलिः॥ १०७॥

expl.— अने वृक्षनी त्वचा ते वस्त्र छे मृग ते सुहृदछे। वृक्षने कोमलफले तृप्ति छे। पर्वतना निर्झरनां जल पीवा छे क्रीडाने अर्थे विद्यारूपिणी स्त्री छे। ते परमेश्वर शरणा(?)हमांनु छु॥

इति श्रीराजराजेश्वरमाहाराजाधिराजमाहाराज श्रीभर्तृहरिविरचितं वैराग्यशतकं संपूर्णं॥ श्री॥ श्रीमालिज्ञातिपत्तनवास्तव्य त्रिवाडी केवलराम

नीलकंठेन लिखितमिदं ॥ गुशांई उद्धपुरवास्तव्य रामगिरपठनार्थं ॥ संवत् १७९८ कार्त्तिक वदि १३ ॥ श्रीरस्तु ॥ कल्याणं भूयात् ॥

कमलभूतनयामुखपंकजे । वसतु ते कमलाकरपल्लवे ।
वपुषि ते रमते कमलांगजः प्रतिदिनं हृदये कमलापतिः ॥ १ ॥

दृष्टप्रत्यया लिखितमिदं ।

वैराग्यशतक with विवेकदीपिका (in हिंदी)

Vairāgyaśataka with Vivekadīpikā (in Hindi)

No. 350 — 387. / 1892–95.

Size.— $8\frac{1}{8}$ in. by $4\frac{1}{2}$ in.

Extent.— 86 leaves; 10 lines to a page; 28 letters to a line.

Description.— Country paper; old but well preserved; Devanāgarī characters, hand-writing clear, legible and uniform; borders ruled in double red lines and edges in single; fol. 1ᵇ and 86ᵃ have a design in the centre.

Age.— Saṁvat 1764.

Author of the text.— Bhartṛhari.

,, ,, ,, Comm.— Indrajit.

Begins.— folio. 1ᵇ

Text— बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमंगे सुभाषितं ॥ १ ॥ etc.

Com.— ॥ ६० ॥ श्रीरामाय नमः ॥ ॐ नमो भगवते वासुदेवाय ॥
करोति श्रीइंद्रजिद्भर्तृहरौ व्याख्यामथोत्तमां ।
वैराग्यशतके यस्याः श्रवणेन सुखं शतां ॥ १ ॥
तहां प्रथमहीं भर्तृहरि लोककी कर्तव्यता देषिपाछितातहै ॥ etc.

Ends.—folio. 85ᵇ (86ᵃ)

Text-- भोगे रोगभयं सुखे क्षयभय वित्तेग्निभूद्भय ।
दास्ये स्वामिभयं जये रिपुभयं रूपेषु योषिद्भयं ॥
माने ग्लानिभयं गुणै(णो) खलभयं देहे कृतांताद्भय ।
सर्वं नामभयं सखे भज रतो वैराग्यमेवाभयं ॥ १०१ ॥

Com.— गुणानिविषैं दुष्टनिकौं भयं ॥ अरुदेहे ॥ शरीरविषैं कृतांतभय ॥ कालकौ भय ॥ ताते सर्वनाम भयं ॥ सवै भय ग्रसित है ॥ हे भखं अरे सखा वैराग्य मेव ॥ वैराग्य…केलौ ॥ अभयं रतःसन् भज ॥ चित्त एकाग्रहेकानिर्भय-पदार्थवैराग्यहि भजु ॥

इति श्रीमत्सकलनृपतिमौलिडिमंडनमनि श्रीमधुकरनृपतितनुज श्रीमदिन्द्र-जिद्विरचितायां विवेकदीपिकाया वैराग्यशतं संपूर्णम ॥ संवत १८६४ वर्षे तिथ १० शनिवासरे लिष्यत सबलसिंह. देवादासवाचिनानं

Aufrecht gives the name of the commentary as Balavabodha. Cat. Catalo. III, 86ᵃ

नीतिशास्त्रसमुच्चय Nitiśāstrasamuccaya

No. 351 312. 1884-86.

Size.— 8½ in. by 3¾ in.

Extent.— 8 leaves; 12 lines to a page; 40-44 letters to a line.

Description.— Country paper; Devanāgarī characters; very old and discoloured; hand-writing very small and not quite legible; red pigment used for verse-numbers; borders ruled with double black lines; edges of folios slightly worn out.

Age.— Appears to be very old.

Author.— Not mentioned.

Subject.— An anthology of verses on morality and good conduct.

Begins.—fol. 1ᵇ

ॐ नमः सरस्वत्यै । नमो गणपतये ॥

सुरासुरशिरोरत्न निघृष्टचरणांबुजे ।
जयंतु भारतीपारनखरत्नामरीचयः ॥ १ ॥
प्रणम्य शिरसा देवं त्रैलोक्याधिपतिं प्रभुं ।
नानाशास्त्रोध्दृतं वक्ष्ये नीतिशास्त्रसमुच्चयं ॥ २ ॥ etc.

Ends.--fol. 8[b]

अभिपो...षु सृष्टेषु [1]...विविधा किक्रियाः ।
कातराये च जल्पति यद्धान्यं त [2] .. . ...
· तांबुलं भारती [3]... ...
· ... अपुर्वाणि दिने दिने ॥ ४१ ।
इति लघुचाणाख्ये [4] ...... श्रीरस्तु ॥ श्री ॥

नृपविलास Nrpavilāsa

No. 352 412. / 1887-91.

Size.— 10⅜ in by 5 in.

Extent. — 10 leaves ; 10 lines to a page ; 25 letters to a line.

Description.— Thin country paper ; Devanāgarī characters ; old in appearance ; hand-writing clear, legible and uniform verse-numbers marked with red pigment ; complete.

Age. — Appears to be old.

Author. — Rāma-Aufrecht refers to this Ms. and mentions the name of the author as Śivarāma. This name given by him appears to be incorrect.

Begins.—fol. 1[b]

श्रीगणेशाय नमः
नत्वा महेशस्य पदारविंदं वागदेवतायाश्चरणांबुजन्म ।
श्रीलक्ष्मणाख्यपितरं प्रणम्य करोमि काव्यं सुगमं लघीयः ॥ १ ॥

The portion in these places is scratched out and illegible.

वसुंधरायां नृपवीरनामा नराधिपोभूदनिवार्यवीर्यः ।
गुणामृतं यस्य निपीयमानानकेविसुह्मंति सुधातिशायी ॥ २ ॥ etc.

Ends. fol. 10b

यं प्रासुत सुतं प्रसूः कविवरं रामाभिधानं सती-।
ख्यातो यस्य मनीषिमंडलविधुः श्रीलक्ष्मणाख्यः पिता ॥
यस्य भ्रातृयुगं महद्विजयते पांडित्यपारंगतं ।
तेनास्मिनरचिते समाप्तिमगमत्सर्गोयमार्द्दिनवः ॥ १०१ ॥

नैषधीयचरित Naiṣadhīyacarita

No. 353 455. 1895-1902.

Size.— $11\frac{1}{4}$ in. by $4\frac{1}{5}$ in.

Extent.— 170 leaves ; 10 lines to a page ; 40 letters to a line.

Description.— Country paper ; old in appearance ; Devanagari characters ; hand-writing clear, legible and uniform , folios extremely moth-eaten ; red and yellow pigment used.

The Ms. is complete in 22 sargas.

The verse यं प्रासुत त्रिलिंगक्षितिपति etc. which follows the verse श्रीहर्षं कविराजराजिमुकुटा etc. at the end of each chapter, forms part of the commentary of नरहरी on the नैषधीयचरित and not of the text. It appears to have been added here by the scribe.

Age.— The Ms. appears to be old.

Author.— Śrī Harṣa.

Begins.—folio 1b

ॐ स्वस्ति सिद्धं ॥ ॐ नमो नारायणाय ॥ ॐ नमः श्रीसरस्वत्यै ॥
ॐ निपीय यस्य क्षितिरक्षिणः कथास्तथाद्रियंते न बुधाः सुधामपि ।
नलस्सितच्छत्रितकीर्तिमंडलः स राशिरासीन्महसां महोज्ज्वलः ॥ १ ॥

रसैः कथा यस्य सुधावधीरिणी नलः स भूजानिरभूद्गुणाद्भुतः ।
सुवर्णदंडैकसितातपत्रितज्वलत्प्रतापावलिकीर्तिमंडलः ॥ २ ॥
पवित्रमत्रातनुते जगद्युगे श्रुता रसक्षालनयेव यत्कथा ।
कथं न सा मद्गिरमाविलामपि स्वसेविनीमेव पवित्रयिष्यति ॥ ३ ॥
etc. ......

folio--10ª

श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं ।
श्रीहीरः सुषुवे जितेंद्रियचयं मामल्लदेवी च यम् ॥
तच्चिंतामणिमंत्रचिंतनफले श्रृंगारभंग्यामहा-।
काव्ये चारुणि नैषधीयचरिते सर्गोयमादिर्गतः ॥ १४६ ॥
यं प्रासूत त्रिलिंग क्षितिपति सतताराधितांघ्रिः स्वयंभूः ।
पातिव्रत्यैकसीमा सुकविनरहरिं नालमायं च मा ... ॥
यं विद्यारण्ययोगी कलयति कृपया तत्कृतौ दीपिकाया-।
मायः सर्गोतिमायत्कविकुलविजयी चारुतीराजितोऽभूत ॥ १४७ ॥

इति नैषधीयचरिते महाकाव्ये प्रथमः सर्गः ॥ १ ॥

folio-- 16ª

श्रीहर्षं ... ... देवी च यम्
द्वैतीयीकतया मितोयमगत्तस्य प्रबंधे महा-।
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥ ११० ॥
यं प्रासूत ... ... जितोभूत्

इति नैषधयिचारिते महाकाव्ये द्वितीयः सर्गः ॥ २ ॥

... ...

folio—161ª

श्रीहर्षं ... ... देवी च यम्
तस्यागादय एकविंशगणनः काव्येति नव्ये कृतौ ।
भैमीभर्तृचरितवर्णनमये सर्गो निसर्गोज्वलः ॥ १६२ ॥
यं प्रासूत ... ... जितोभूत् ॥ १६३ ॥

इति कविवरश्रीहर्षकृतौ नलचनिते नैषधनामकाव्ये एकविंशः सर्गः ॥ २१ ॥

Ends.—folio 170ª,

स्वर्भानुप्रतिवारपारणमिलद्दंतौघयंत्रोद्भव—।
श्वभ्रालीपतयालुदीधितिसुधासारस्तुषारद्युतिः ॥
पुष्येषु सनतत्प्रियापरिणयानंदाभिषेकोत्सवे ।
देवः प्राप्तसहस्रधारकलशश्रीरस्तु नस्तुष्टये ॥ १४८ ॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं ।
श्रीहीरः सुषुवे जितेंद्रियचयं मामल्लदेवी च यम् ॥
द्वाविंशे नवसाहसांकचरिते सर्गो निसर्गोज्वलः ॥ १४९ ॥
यं प्रासूत ... ... जितोभूत् ॥ १५० ॥

इति श्रीनैषधीयमहाकाव्ये चंद्रवर्णनं नाम द्वाविंश सर्गः ॥ २२ ॥

Then follow

यथा यूनस्तद्वत्परमरमणीयापि रमणीं ।
कुमाराणामंतःकरणहरिणं केन कुरुते ॥
मदुं(दु)क्तिश्चेतश्चेमेदयति सुखीभूय सुधियः ।
किमस्या नीतं स्यादरसपुरुषानादरभरैः ॥
दिशि दिशि कविग्रावाणस्तां वसुंतु सरस्वतीं ।
तुलयति मिथो या सा पालस्फुरद्धनिडंबरम् ॥
स परमपरक्षीरोदन्वान्यदीयमुदीयते ।
मयि(थि)तुरमृते खेदच्छेदिप्रमोदनसोदरं ॥
जिह्वे मौनमथा स्तैन्यं व्रतमेकं वहेच्छया ।
सुखे निलीय निष्टंत्या न ते ऱ्हीस्तमसा भृशम् ॥
साहित्ये सुकुमारवस्तुनि दृढन्यायग्रहग्रंथिले ।
तर्के वा मयि संविधातरि समं लीलायते भारती ॥
शय्यावास्तुमृदूत्तरच्छदवती दर्भांकुरैरावृतः ।
भूमे वा हृदयंगमो यदि पतिस्तुल्या रति योषिताम् ॥
तास्य नैषधकर्तुमतिज्ञेयम् ॥ शुभमस्तु सर्वंजगताम् ॥
श्रीरामाय नमः

References.— 1 Aufrecht's Catalogus Catalogorum Part I, page 306ᵇ Part II, pages 66ᵇ; 208ª Part III, page 65.

2 Winternitz— History of Indian Literature Vol III, pages 54, 76f.

3 A. B. Keith— History of Sanskrit Literature pages 18, 139-42, 147.

4 H. D. Velankar— B. B. R. A. S. Mss. Catalogue Part II, Nos. 1200-1202

Des. Cat. A. S. B. Vol. VII, Nos. 5124-30.

5 Descriptive Catalogue of Mss., Madras Vol. XX, page 7755-63; Nos. 11543-69.

6 Printed Editions:— The work is generally published with commentaries on it. An English translation, with critical notes and extracts from unpublished commentaries appendices and a vocabulary, is published by Prof. K. K. Handiqui, M.A., in the Punjab Oriental Series, No. XXIII, 1934.

In his Introduction, which covers 43 pages, he gives some information about the following commentators on the Naiṣadhīyacarita of Śrī Harṣa:—

(1) Caṇḍupaṇḍita	pp.	I–VII
(2) Vidyādhara	,,	VII–XI
(3) Īśānadeva	,,	XI–XIII
(4) Narahari	,,	XIII–XVI
(5) Viśveśvara	,,	XVI
(6) Jinarāja	,,	XVII–XVIII
(7) Mallinātha	,,	XVIII–XX
(8) Nārāyaṇa	,,	XX–XXII.

नैषधीयचरित Naiṣadhīyacarita

No. 354 $\frac{635.}{1883\text{–}84.}$

Size.— 12½ in. by 4⅛ in.

Extent.— 16 leaves; 17–18 lines to a page; 54 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing uniform, but very small and closely

written ; borders ruled in double black lines ; yellow pigment occasionally used for corrections

The Ms. contains I–V Sargas.

Age.— The Ms. appears to be old.

Author.— Śrī Harṣa.

Begins.--folio 1[b]

श्रीगणेशाय नमः

निपीय यस्य etc. as in No. 353.

folio— 5[a] श्रीहर्ष etc. up to सर्गोयमादिर्गतः as in No. 353.

folio— 7[b] श्रीहर्ष etc. सर्गो निसर्गोज्वलः as in No. 353.

Ends.--folio 16[b]

यं प्रासूत सहस्रपाद्दुदभवत्पादेन खंजः कथं ।
स छाया तनयः सुतः किल पितुः सादृश्यमन्विछति ॥
एतस्योत्तरमद्य नः समजनि त्वत्तेजसां लंघने ।
साहस्रैरपि पंगुरंघ्रिभिरभिव्यक्ती भवन्भानुमान् ॥ ३६ ॥
इत्याकर्ण्य क्षितीशस्त्रिदशपरिषदस्तागिरश्चाङ्गगर्भा
वैदर्भी कामुकोपि प्रसभविनिहितं दूत्यभारं बभार ॥
अंगीकारं गतेस्मिन्नमरपरिवृढः संभूतानंदमूचे ।
भूयादंतर्द्धिसिद्धेरनुविहितभवश्चित्तना यत्र तत्र ॥ ३७ ॥
श्रीहर्षं ... ... देवी च यम्
तस्य श्रीविजयः प्रशास्तिरचना तातस्य भव्ये महा-।
काव्ये चारुणि वैरसेनिचरिते सर्गोगमत्पंचमः ॥ ५ ॥ छ ॥
श्रीगोपालकृष्णार्पणमस्तु ॥

References.— See No. 353

नैषधचरित Naiṣadhacarita

No. 355 515. / 1891–95.

Size.— 10⅕ in. by 4⅗ in.

Extent.— 153 leaves; 9 lines to a page; 32 letters to a line.

Description.— Country paper, white and bluish in colour; Devanāgarī characters; hand-writing clear, legible and uniform; borders ruled in two double black lines; folios 1, 2, 5, 12, 16, 23, 24, 29-31, 34, 36, 56, 63, 69, 73, 77, 79, 81, 84-86, 88, 91, 92, 106, 113, 120, 127, 129, 139, 141, 142, 144, 145, 146, 148, 149, 150, 171 and 192 missing, incomplete.

The Ms. contains I–XVIII sargas.

Age.— The Ms. is not very old.

Author.— Śrī Harṣa.

Begins.—abruptly folio. 3[a]

... चारदृगप्य वर्त्तत १३

तदोजसस्तयशसस्थितांविमा वृथेति चित्ते कुरुते यदा यदा ।

तनोति भानोः परिवेषकैतवात्तदाविधिः कुंडळनां विधोरपि ॥ १४ etc.

folio 18[a] श्रीहर्षं etc. up to सर्गोयमादिर्गतः ॥ १४४ ॥ as in No. 353.

विहंगमसंगमनो नाम प्रथम सर्गः ॥

folio 191[b] श्रीहर्षं पूर्ववत् ॥

जातोस्मिन् शिवशक्तिसिद्धिभगिनी सौभ्रात्रभव्ये महा-।

काव्ये तस्य कृतौ नळीयचारिते सर्गोयमष्टादशः १५५

Ends.—folio 194[b]

अनातिशिथिळे पुंभावे येन प्रगल्भ्यचळाः ।

खलु प्रसभमळयः पाथोजास्ये निविश्य निरित्वराः ॥

किमपि मुखगं कृत्वा नींत वितीर्य सरोजिनी ।

मधुरसमुषो योगे जायांनवाम्ब ... ... ॥

References.— See No. 353

नैषधीयचरित Naiṣadhīyacarita

No. 356 499.
1887–91.

Size.— 10 in. by 4 in.

Extent.— 78 leaves ; 8 lines to a page ; 40 letters to a line.

Description.— Country paper ; old in appearance , Devanagari characters ; hand-writing clear, legible and uniform ; borders ruled in two double black lines ; folios 1 and 3 to 30 missing.

The Ms. contains I-XI sargas. Sargas 1–3 and 13 verses of sarga 4, are wanting as foll. 3-30 are missing.

Age.— The Ms. appears to be old.

Author.— Śrī Harṣa.

Begins.— abruptly folio. 2ᵃ

... ... विदेतन्मुख चंद्रचंद्रिका ।
इमां किमावामयसेनचक्षुषी चिरं चकोरस्य भवन्मुखस्पृशी ॥ ६ ॥
अपां विहारे तवहारविभ्रमं करोतु नीरेपृषद्गुत्करस्तरन् ।
कठोर पीनोच्चकुचद्वयीतटत्रटत्ररवसारवोर्मिजः ॥ ७ ॥ etc.

folio 38ᵇ श्रीहर्षं कविराजराजिमुकुटालकारहीरः सुतं ।
श्रीहीरः सुषुवे जितेंद्रियचयं मामल्लदेवी च यम् ॥
तुर्यस्थैर्यविचारणाप्रकरणभ्रातर्ययं तन्महा ।
काव्येत्र व्यगलन्नलस्य चरिते सर्गो निसर्गोज्वलः ॥ १२८ ॥

folio 48ᵃ श्रीहर्षं ... ... देवी च यम् ॥
तस्य श्रीविजयप्रशस्तिरचना तातस्य नव्ये महा ।
काव्ये चारुणि वैरसेनीचरिते सर्गोगम पांचमः ॥

folio 96ᵃ श्रीहर्षं ... ... देवी च यम् ॥
तर्केष्वप्यश्रमस्य दशमस्तस्य व्यरंसी महा–।
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्वलः ॥ १० ॥

Ends.— folio. 106ᵇ (107ᵃ)

सानंतानाथ तेजः सखनिखिलमरुत्पार्थिवान् दृष्टिभाज–।
श्चिते नाशाङ्कुषस्तात्समसलग्रुऽणान् संचती गूढभावा ॥

पारे वाग्वर्तिरूपं पुरुषमनुचिदंभोधिमेकं शुभांगी ।
निस्सीमानंदमासीदुपनिषदुपमा तत्परीभूय भूयः ॥ १२५ ॥
श्रीहर्षं कविराजराजिमुकुटालंकारहीरः सुतं ।
श्रीहीरः सुषुवे जितेंद्रियचयं मामल्लदेवी च यं ॥
श्रृंगारामृतशीतगावयमगादेकादशस्तन्महा ।
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्वलः ॥ ११ ॥
श्रीरामचंद्रय नमः ॥ श्रीरघुनाथय नमः ॥ श्रीराम ॥ शुभं ॥

References.— See No. 353

नैषधचरित — Naiṣadhacarita

No. 357 — $\frac{39.}{1880-81}$

Size.— $12\frac{3}{8}$ in. by $2\frac{1}{4}$ in.

Extent.— 179 leaves ; 4-5 lines to a leaf ; 44 letters to a line.

Description.— Palm-leaves ; Devanāgarī characters with पृष्ठमात्राs ; hand-writing clear and legible ; borders ruled in double black lines ; blank space in the centre with holes for a string to pass through ; one-half part of the last leaf is lost ; carefully preserved in a wooden-box.

The Ms. contains cantos I-XII.

Age.— The Ms. is old.

Author.— Śrī Harṣa.

Begins.—folio. 1^b

नमः शिवाय ॥

निपीय यस्य etc. as in No. 353

folio 17^b श्रीहर्षं ... ...

तच्चिंतामणिमंत्रचिंतनफले श्रृंगारभंग्यामहा ।
काव्ये चारुणि नैषधस्य चरिते सर्गोयमादिर्गतः ॥ १४५ ॥

folio 45^b श्रीहर्षं ... ...

तात्तीयी कतयामितोयमगमत्तस्य प्रबंधे महा।
काव्ये चारुणि वैरसेनिचरिते सर्गो निसर्गोज्वलः ॥ १३५॥

folio 162^b श्रीहर्षं ... ...

शृंगारामृतशीतगावयमगादेकादशस्तन्महा।
काव्येस्मिन्निषधेश्वरस्य चरिते सर्गो निसर्गोज्वलः ॥ १२७॥

Ends.—folio. 179^a

तदक्षरैः सस्मितविस्मिताननां निपीयतामीक्षणभंगिभिः स ...

... ...

References.— See No. 353.

नैषधचरित Naiṣadhacarita

No. 358 88.
1919–24.

Size.— 15 in. by $2\frac{1}{4}$ in.

Extent.— 146 leaves ; 7 lines to a page ; 64 letters to a line.

Description.— Country paper ; old in appearance ; Devanāgarī characters with पृष्ठमात्राs ; hand-writing clear ; portion in many places scratched out and hence not legible ; folios extremely moth-eaten ; edges damaged to a certain extent ; folios stuck together ; last few folios damaged ; complete ; preserved in a wooden-box.

The Ms. was acquired from Kerala and presented to this library by Mr. P. R. Bhandarkar.

Age.— Saṁvat 1420(?).

Author.— Śrī Harṣa.

Begins.—folio. 1^b

... ... तथाद्रियंते न बुधः सुधामपि etc.
as is No. 353.

folio 15[a] श्रीहर्ष ... ...

द्वैतीयीकतयामितोयमगमत्तस्य प्रबंधे महा।
काव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्वल. ॥ १०९ ॥

folio 138[b] श्रीहर्ष ... ...

तस्य श्रीदयमेकविंशगणन' काव्येति नव्यं कृतौ।
भैमीभर्तृचरित्रवर्णनमये सर्गो निसर्गोज्वलः ॥ १६० ॥

Ends. folio 146[a]

स्वभानु etc. ... up to सर्गो निसर्गोज्वल' ॥१५०॥ as in No. 353

संवत १४२ (०)? प्र० भाद्रपद शुदि ७ ...

References See No. 353

नैषध	Naiṣadha
with	with
नैषधीयप्रकाश	Naiṣadhīyaprakāśa
No. 359	135. / 1866–68.

Size.— 13 in. by 4½ in.

Extent.— 452 folios ; 8 lines to a page ; 54 letters to a line.

Description.— Modern paper, somewhat bleish in colour ; Devanagarī characters ; bold and legible hand-writing ; the volume is bound in leather apparently in 1867 when the copy was made from some old Ms. at Kolhapur. The different Sargas have their folios separately numbered as under :—

Sargas	Folios	Sargas	Folios
I	58	VII	37
II	36	VIII	33
III	46	IX	45
IV	37	X	40
V	43	IX	44
VI	33		

The following works and authors are mentioned :—

अमर—1, 3 and innumerable times.
भागवत—I, 5
भाष्यकार मत—I, 8
विष्णुपुराण—I, 20, II, 27
विश्वः —I,27, 30 and many times
याज्ञवल्क्य—II, 5, V, 6
गीता—II, 26
विश्वप्रकाश—IV, 2
अनेकार्थध्वानिमंजरी—IV, 27
वामनाचार्य वचनात्—V, 34
याज्ञवल्क्योक्तं व्यवहाराध्याये—VII, 13
काव्यप्रकाश—IX, 15
क्षीरस्वामी—X, 21

Age.— Śaka 1789 (= 1867 A. D.) a modern copy.

Author.— Nārāyana Bedarkar, Son of Narasimha Pandita and Mahālasā.

Subject.— Kāvya (comm. on the Naiṣadhīya of Śrīharṣa).

Begins.— folio 1b

Text— निपीय यस्य etc. as in No. 353

Com.— श्रीगणाधिपतये नमः श्रीजानकीवल्लभाय नमः ॥
वैदेही यस्य वामे जयति जयजानिर्दक्षिणे लक्ष्मणोपि ।
श्रीमानग्रे हनूमानतुलवलचयो हस्तविन्यस्ततत्वः ॥
कोदंडं कांडमेकं दधद्दहितकुलध्वंसकारी समंता-।
दव्यादव्याजभव्याकृतसलिलनिधिर्ज्जानकीजानिरस्मान् ॥ १ ॥
दशकंधरकरिसिंहः सीताचेतः सरोजरोलंबः ।
रघुकुलकैरवचंद्रः पायादायासतो रामः ॥ २ ॥
भद्राय भूयाद्भवतां श्रीरामो भक्तिभावतः ।
स्मृतेरुज्जृंभते यस्य पदवी सुरदुर्लभा ॥ ३ ॥
नत्वा श्रीनरसिंहपंडितपितुः पादारविंदद्वयं ।
मातुश्चापि महालसेत्यभिधया विख्यातकीर्तेः क्षितौ ॥

श्रीरामेश्वरसीतयोः सुमनसोर्गुर्वोरगर्वौ यथा।
सुन्द्दि श्रीनिषधेंद्रकाव्यविवृतिं निर्माति **नारायण** ॥ ४॥

प्रणम्य शंकरं सोममनंतं श्रीपतिं समं।
कुर्वे नाम्ना **नैषधीयप्रकाशं** सुहृदां मुदे ॥ ५॥

चिकीर्षितस्य निर्विघ्नसमाप्त्यर्थं शिष्टाचारपरिप्राप्तमाशीर्नमस्क्रियावस्तु-निर्देशो वापि तन्मुखमिति मंगलाचरणं कर्तव्यमिति ग्रंथकृच्छ्रीहर्षनामा कवि-र्विशिष्टवस्तुनिर्देशलक्षणं मंगलमाह ॥ निपीयेति॥ अत्र पुण्यश्लोकनलरूप-विशिष्टवस्तुनिर्देशेन निर्विघ्नग्रंथसमाप्तिरित्यभिप्रायेणाह ॥ etc.

folio 58ª इति श्रीवेदवरदकरोपनाम श्रीनृसिंहपंडितात्मज **नारायण**विरचितं **नैषधीयप्रकाशे** प्रथमः सर्गः ॥ १ ॥ शुभमस्तु ॥

शके १७८९ प्रभवनामसंवत्सरे ज्येष्ट कृष्ण ११ तद्दिने इदं ग्रंथलेखन क्षेत्र कोलापुरे नृसिंहात्मज बालकृष्णेन लिखितम् ॥ ग्रंथसंख्या प्र. स. १७००

folio 36ª of 2 nd Canto

इति etc. ... ... द्वितीय सर्गः समाप्त ॥ २ ॥

क्षेत्र कोलापुरे नृसिंहात्मज बालकृष्णेन लिखितं शके १७८९ ज्येष्ट कृष्ण १३

folio 40ª of 10th Canto

इति etc. ... ... दशमः सर्गः ॥ १० ॥

शके १७८९ प्रभवनामसंव० आश्विन शुक्ल १४ तद्दिने बालकृष्णेन लिखितम्

Ends.—folio 44ª,

श्रीहर्षमिति ॥ शृंगारामृतसीतगावयमसावेकादशस्तन्मऽहा—।
काव्येस्मिन्निषधेश्वरस्य चरिते सर्गो निसर्गोज्वलः ॥ १२० ॥

इति श्रीवेदरकारोपनामश्रीमन्नरसिंहपंडिताऽत्मज**नारायण**कृते **नैषधीय-प्रकाशे** एकादशः सर्गः ॥ समाप्तः ॥ संपूर्ण ॥ ११ ॥ शुभमस्तु ॥

श्रीराम ॥ शके १७८९ प्रभवनामसंवत्सरे आषाढ वद्य ३ तद्दिने समाप्तं ७ इदं पुस्तकं रुकडीकरेत्युपनामक गणेशशास्त्रिणा यथाप्रति अशोधि ७ ग्रंथसंख्या १२०७

References.— Aufrecht-Catalogus Catalogorum— i, 306ᵇ ; ii, 66ᵇ] 208ª ; iii, 65ᵇ.

See also A. S. B. Cat. Vol. VII, Nos. 5136-7; Mad.

Cat. Vol. XX, Nos. 11601-02 for described Mss. Naiṣadha-carita with the comm. of Nārāyaṇa (in 22 Sargas) has been edited with critical notes by Pandit Śivadatta and published at the Nirṇayasagar Press, Bombay, 1894.

नैषधीयप्रकाश Naiṣadhīyaprakāśa

No. 360 139. 1866-68.

Size.— $9\frac{1}{2}$ in. by $3\frac{4}{5}$ in.

Extent.— 248 leaves ; 10 lines to a page , 40 letters to a line.

Description.— Country paper ; old in appearance ; Devanagari characters ; hand-writing clear and legible but not uniform ; borders ruled in two double black lines ; red and yellow pigment used ; folios moth-eaten ; separate pagination for each canto.

The Ms. is a bound copy and contains I–VI cantos.

Age.— The Ms. appears to be old.

Author —Nārāyaṇa.

Begins.— folio. 1[b]

श्रीमहागणपतये नमः ॥

वैदेही यस्य वामे etc. as in No. 359

folio 55[b]

इति वेदरकरोपनामक श्रीमन्नृसिंहपंडितात्मजनारायणविरचिते नैषधीयप्रकाशे प्रथमः सर्गः ॥

folio 34[a] of 2 nd Canto.

इति etc. ... द्वितीयः सर्गः समाप्तिमगमत संवत् १८४६ चैत्रमासे शुक्लपक्षे १५ शुकरवार ॥ श्रीराम ॥

Ends.— folio 33[a] of 6 th Canto.

Com.— षण्डः स्यात्खंड शकले चक्षुविकारे मणिवोषयोरिति विश्वः । षण्डः पूर

षोडष्टिषट्कतीत्यादिना शुक्र । अस्मिन्सर्गे दूतगुणाधर्मशास्त्रद्वारेणोक्ताः ११३
इति श्रीमन्नरसिंहपंडितात्मज नारायणकृते नैषधीयप्रकाशे षष्ठः सर्गः

References.— See No. 359

नैषधीयप्रकाश Naiṣadhīyaprakāśa

No. 361 134. / 1866-68.

Size.— $12\frac{1}{5}$ in. by $7\frac{4}{5}$ in.

Extent.— 57 leaves, 11 lines to a page; 36 letters to a line.

Description.— Modern blue paper with water-marks; Devanāgarī characters; hand-writing bold, clear and legible; a bound copy.

The Ms. contains only the 1st canto. This Ms. appears to be a copy of a Ms. written in Saṁvat 1740.

Age.— A modern copy.

Author— Nārāyana.

Begins.—folio 1[b]

॥ श्रीगणेशाय नमः ॥
वैदेही यस्य वामे etc. as in No. 359

Ends.—folio 57[a]

Com.— नैषधीयं नलसबंधिचरितं यस्मिन्नेवंविधे माहाकाव्ये अयमादिः प्रथमः सर्गोगतः समाप्तः ॥ चिंतामणिमत्र चिंतनसामर्थ्यादेवंविध कावांकृतमिति भाव: ॥ शार्दूलविक्रिडितं ॥ नैषधसंबंधिय नैषधीयं तृद्धाछः ॥ छस्यलंकाराश्चात्र नोक्ताः लक्षणग्रंथगौरवभिया ॥ ते सुधिया ग्रंथांतरात् ज्ञातव्याः ॥ इति श्रीवेदरकरोपनाम श्रीनरसिंहपंडितात्मज नारायणविराचिते नैषधीयप्रकाशे प्रथमः सर्गः ॥ सर्गश्लोकसंख्या १५०० ॥ श्री । संवत् १७४० वर्षे शाके १६०५ प्रवर्त्तमाने फाल्गुनमासे शुक्लपक्षे अष्टम्यां बुधवासरे वेणीदत्तेन लिखितोयं सर्गः ॥ समाप्तः ॥ श्री ॥ छ ॥

References.— See No. 359

नैषध with
नैषधीयप्रकाश

Naiṣadha with
Naiṣadhīyaprakāśa

No. 362

368.
1884-87.

Size.— $10\frac{2}{5}$ in. by $4\frac{1}{5}$ in.

Extent.— 105 leaves; 11-12 lines to a page; 38 letters to a line.

Description.— Country paper; old in appearance, Devanagari characters; hand-writing clear, legible and uniform borders ruled in double black lines; folios after 62 of 21st canto and foll. 1-15 of the 22nd canto missing; there are two additional folios numbered 15 and 25 containing verses from the 1st and the 11th canto.

The Ms. contains XXI-XXII cantos.

Age.— Saṁvat 1693.

Author of the text.— Śrī Harṣa.

,, ,, ,, comm.— Nārāyaṇa.

Begins.— folio 1[b]

श्रीराधावल्लभजय ॥

Text— तं विदर्भरमणीमणिसौधादुज्जिहानमनुदर्शितसेवैः।
अर्प्पणान्निजकरस्य नरेंद्रैरात्मनः कृतपुनरुक्ते ॥ १ ॥ etc.

Com.— इदानीं पूर्वसंगतिप्रस्तावित मध्यान्हस्नानदेवपूजादिवर्णनार्थमेकविंशं सर्गमारभ्यते । तमिति । etc.

Ends. (Text) —fol 54[a]

स्वर्भानुप्रतिवारपारणमिह etc. up to श्रीरस्तुनस्तुष्टये
as in No. 353

fol 55[a] श्रीहर्षं etc. up to सर्गो निसर्गोज्वलः as in No. 353

Ends. Com.—folio 57[b]

संतः संतु परप्रयोजनकृतः कल्पद्रुमो नः सदा ।
स्वस्मिन्नेव पथि प्रवर्त्तनपराः सत्कीर्त्तिपथ्यापरे ॥
अन्येर्निस्पृहणाः श्रितश्रुतिपथा दीव्यंतु भव्याशयाः ।
कांकंतः कलहप्रियाः खलजनाः जायंतु जीवंतु वा ॥ १ ॥

वासनामस्मशामस्य किंकरस्य जगत्पते ।
नोचेत्पूरय कल्पेश कल्पस्य तव किंकराः ॥ २ ॥

इति श्रीवेदकरोपनाम श्रीमन्नृसिंहपंडितात्मज नारायणकृते नैषधीयप्रकाशे द्वाविंशति· सर्गः ॥ संवत् १६८२ . वर्षे ज्येष्ठशुदि पचमी लिषतं वल्लभदास श्रीगुशाइरासदास पुस्तक लिषायितं ॥

References.— See No. 359

नैषध with
नैषधीयप्रकाश

Naiṣadha with
Naiṣadhīyaprakāśa

No. 363

717.
1886–92.

Size.— $9\frac{1}{5}$ in. by $4\frac{1}{5}$ in.

Extent.— 72 leaves ; 14 lines to a page ; 45–50 letters to a line.

Description.— Country paper , Devanāgarī characters , hand-writing clear, legible and uniform ; red pigment used for verse-numbers etc. and yellow for corrections ; separate pagination for every canto.

The Ms. contains cantos II–III and 89 verses of the IVth canto.

Age.— The Ms. appears to be old.

Author of the text.— Śrī Harṣa.

„ „ „ comm.— Nārāyana.

Begins.— folio 1b

Text— अधिगत्य जगत्यधीश्वराद्थ मुक्तिं पुरुषोत्तमात्ततः ।
वचसा मणिगोचरो नयः स तमानंदमविंदत द्विजः ॥ १ ॥ etc.

Com.— श्रीगणेशाय नमः ॥ हंसमुखेन भैमीवर्णनार्थं द्वितीयं सर्गमारभते। अधिगत्येति । अथ मोच्चनानंतरं स द्विजो हंसस्तमानंदं लोकोत्तरं हर्षमविंदत लेभे । etc.

folio 25[a]

इति श्रीवेदकरोपनाम श्रीमन्नरसिंहपंडितात्मज नारायणकृते नैषधीय-

प्रकाशे द्वितीयः सर्गः ॥ २ ॥ श्री ॥ राम

folio 30[b] इति etc. ... तृतीयः सर्गः ॥ ३ ॥

Ends.—folio. 17 of Canto IV

Text— अपि विधिः कुसुमानि तवाशुगान्स्मरविधायननिर्वृतिमाप्तवान् ।
अदितपंचहिते स नियम्यतांस्तदपि तैर्वत जर्जरितं जगत ॥ ८९ ॥

Com.— त्वादृशो हिंस्र कोपिनेत्यर्थः क्रियातिपत्तौलङ् ॥ ८८ ॥

References.— See No. 359

नैषध with
नैषधीयप्रकाश

Naiṣadha with
Naiṣadhīyaprakāśa

No. 364

137.
1866–68.

Size.— 13 in. by 4½ in.

Extent.— 414 leaves ; 8 lines to a page ; 54 letters to a line.

Description.— See No. 135 of 1866-68. Canto XVII is missing; 3 folios, after 26, of canto XII are wrongly numbered.

This Ms. appears to be the second part of No. 135 o 1866-68 having cantos XII to XXII.

Age.— Śaka 1789.

Author of the text.— Śrī Harṣa.

" " " comm.— Nārāyaṇa.

Begins.—folio 1[b]

श्रीगणेशाय नमः ॥ इदानीं नूतनसमागत राजवर्णनार्थं द्वादशसर्ग मारभते ॥

Text— प्रिया ह्रियालंब्य विलंबमाबिला विलासिनः कुंडिनमंडनायितं ।
समाजमाजग्मुरथो रथोत्तमास्तमा सद्मद्रावपरे परे नृपाः ॥ १ ॥ etc.

Com.— अथो नंतरं अपरे अन्ये नृपा आसमुद्रात् समुद्रमवधीकृत्य दिगंतेभ्यः सकाशादित्यर्थः ॥ तं कुंडिनस्य मंडनायितं भूषणवदाचरितमलंकारकं समाज स्वयंवरसभामाजग्मुः ॥ etc.

folio 44ª of 12 th Canto.

इति श्रीवेदरत्नाकरोपनामक श्रीमन्नरसिंहपंडितात्मज **नारायणकृते नैषधियप्रकाशे** द्वादशः सर्ग· समाप्तः ॥ १२ ॥

श्रीरस्तु ॥ शुभं भवतु ॥ शके १७८९ प्रभवनामसंवत्सरे भाद्रपदमासे शुक्लपक्षे ६ सौम्यवासरे तद्दिने क्षेत्र कोलापुरे नृसिंहात्मज बालकृष्णेन लिखितम् ॥ ग्रंथसंख्या १२७६ ॥

folio 38ª of 13 th Canto इति etc. ... ... त्रयोदशः सर्गः समाप्तः

folio 75ᵇ of 21 st Canto इति etc. .. ... एकविंशतितमः सर्गः ॥ २१ ॥

Ends. — (Text) fol 42ª

स्वर्भानुप्रतिवारपारण etc. up to श्रीरस्तु न स्तुष्टये as in No. 353

Ends. Com.— folio 44ᵇ,

संतः संतु etc. ... up to तव किंकराः ॥ as in No. 362

followed by इति **श्रीवेदरकरोपनाम** श्रीमन्नृसिंहपंडितात्मज **नारायणकृते नैषधीयप्रकाशे** द्वाविंशति सर्गः २२ शके १७८९ प्रभवनामसंवत्सरे भाद्रपद शुक्ल १० तद्दिने समाप्त ७ इदं पुस्तकं रुकडीकरेत्युपनामक गणेशास्त्रिणा यथाप्रति अशोधि ७ ग्रंथसंख्या १८३६

References.— See No. 359

नैषधीयचरित
with
नैषधीयप्रकाश

Naiṣadhīyacarita
with
Naiṣadhīyaprakāśa

No. 365

636.
1883–84.

Size.— $11\frac{1}{8}$ in. by 5 in.

Extent.— 888 leaves ; 9-10 lines to page ; 40 letters to a line.

Description.— Country paper; old in appearance; Devanagari characters; hand-writing clear and legible, borders ruled in triple red lines; separate pagination for each canto, folio 22 of sarga 8 and fol. 35 of sarga 19 missing.

The Ms. contains sargas VI-XXII.

Age.— The Ms. appears to be old.

Author of the text.— Śrī Harṣa.

,, ,, ,, comm.— Nārāyana.

Begins.— folio 1[b]

Text— दूत्याय दैत्यारिपते. प्रवृत्तो द्विषां निषेद्धानिषधप्रधानं ।
स भीमभूमिपतिराजधानी लक्ष्मीचकाराथ रथस्यदस्य ॥ १ ॥ etc.

Com.— श्रीगणेशाय नमः ... येति अथ दूत्यांगीकारादनंतरं दैत्यारयो देवास्तेषां पतिरिंद्रस्तस्य दूत्याय दूत्यकर्मणे प्रवृत्तः उद्युक्तः द्विषां निनिषेधा परंतप स निषधप्रधानं निषधदेशानामधिपः भीमनामनामको भूमिपतिः राजा तस्य राजधानीं कुंडिनाख्यां रथस्पंदो जवस्तस्य लक्ष्मीचकार ... प्रतिप्रययाविव्यर्थः. etc.

folio 49[b] of 6 th Canto

इति श्रीमन्न(र)सिंहपंडितात्मज नारायणकृते नैषधीयप्रकाशे षष्ठः सर्गः समाप्तः ॥

folio 57[a] of 7 th Canto

इति etc. ... ... सप्तमः सर्गः समाप्तः ॥

... ...

folio 85[a] of 21 st Canto.

इति etc. ... एकविंशतितमः सर्गः समाप्तः २१ ॥

Ends.— folio 70[a]

Text- स्वर्भानुप्रतिवारणा etc. up to सर्गो निसर्गोज्वलः as in No. 353

Com.— संतः संतु etc. up to तव किंकर as in No. 362
followed by इति श्रीवेदरकरोपनाम श्रीमन्नृसिंहपंडितात्मज नारायणकृते नैषधीयप्रकाशे द्वाविंशति (त) मः सर्गः २२ समाप्तोयं नैषधटीका नारायणी शुभं भवतु लेखक पा(ठ)कयोः श्रीरस्तु ॥

References.— See No. 359

नैषधीयप्रकाश Naiṣadhīyaprakāśa

No. 366 81. / A. 1883-84.

Size.— $11\frac{3}{4}$ in. by $5\frac{1}{2}$ in.

Extent.— 485 leaves, 10–13 lines to a page; 40 letters to a line.

Description.— Country paper; old in appearance; Devanāgarī characters; hand-writing bold, clear and legible; borders ruled in two double black lines; red and yellow pigment used; separate pagination for each canto; fol. 42 of canto 21 missing, folio, following fol. 27 of canto 9 numbered 29 instead of 28; fol. 12 of canto 10, repeated; folios of canto 7 are not uniform with other folios and their edges are slightly moth-eaten.

Contains Sargas III-XXII.

Age.— The Ms. appears to be old.

Author.— Nārāyaṇa.

Begins.— folio 1[a]

॥ ॥ श्रीरामचंद्राय नम' ॥ ॥ अथ भैम्याः पुरस्तान्नलस्य गुणान्हंसमुखेन वर्णयितुं तृतीयसर्गमारभते । आकुंचिताभ्यमिति अथोपत्तनप्राप्त्यनंतरं मंडलकरणानंतर वा हमः आकुंचिताभ्यर्थ कृतसंकोचाभ्यां पक्षतिभ्यां नभोविभागात् आक ... देशान्तरसा वेगेनावतीर्य उपभैम्यसमीपे भुमौ पपात् etc. ...

folio 37[a] इति श्रीबेदरकरोपनाम श्रीमन्नरसिंहपंडितात्मज नारायणकृते नैषधीयप्रकाशे तृतीयः सर्गः ॥ शुभमस्तु ॥ श्रीरामचंद्राय नमः ॥ श्रीरघुनाथाय नमः ॥

folio 30[a] of 5th Canto इति etc. ... पंचम सर्गः

... ...

folio 49[a] of 21 st Canto इति etc. एकविंशतितमः सर्गः ॥ २१ ॥

सर्गसंख्या १६८० श्लोक ११००

Ends.— folio 38[a], of 22 nd Canto

श्रीहर्षकवेरियं काव्यरचनारूपाकृतिः कृतिनां सुधियां मुदे आनंदाया-

भ्युदीयात् कृतिनामानंदं कुर्वत्याकल्पमतिवृद्धिं प्राप्नुयादित्याशीः सर्वत्र यच्छब्दानिर्वाहो गुण एवा अभ्युदियादितीगता वित्यस्य रूपं ॥ १५५ ॥

संत संतु etc. up to जीवंतु वा ॥ as in No. 362 followed by इति श्रीदेवकरोपनाम श्रीमन्नरसिंहपंडितात्मज नारायण कृते नैषधीयप्रकाशे द्वाविंशतितमः सर्गः ॥ २२ ॥ ... कं भट्टशंकरस्य

References.— See No. 359

नैषधकाव्यटीका Naiṣadhakāvyaṭīka
नैषधीयप्रकाशिका Naiṣadhīyaprakāśika

No. 367 718. / 1886-92.

Size.— $10\frac{3}{4}$ in. by $4\frac{1}{3}$ in.

Extent.— 85 leaves ; 11 lines to a page ; 54 letters to a line.

Description.— Country paper, old in appearance ; Devanagarī characters ; hand-writing clear, legible and correct but not uniform ; borders ruled in double black lines ; edges of folios much damaged ; separate pagination for each canto.

The Ms. contains cantos XVII and XIX only. The commentary on both the cantos appears to be by Nārāyaṇa and not by Śeṣa Rāmacandra as stated in the colophons. Cf. the following remark of Siva Datta at the end of canto XVII on page 783 (foot-note) of his edition of Naiṣadhacarita :—

द्वित्रपुस्तकानुरोधेनेत्थं लिखितम् । पञ्चषपुस्तकेषु तु ' इति श्रीशेषरामचंद्र-विरचितायां नैषधचरितभावद्योतनिकायां सर्वानवद्यकारिण्यां सप्तदशः सर्गः ' इति लिखितं दृश्यते । पुस्तकानि तूभयविधान्यपि प्राचीनानि दृश्यन्ते ।

Age.— The Ms. appears to be old.

Author.— Nārāyaṇa.

Begins.— fol. 1[b]

श्रीगणपतये नमः ॥ ॥ अथेति । अर्थ(थ) स्वर्गमनाचिंतमानंतरं धरित्रीं प्रति-

धावनेन जनितं प्रयासं वृथैव वृथा प्रायं द्व्यर्थमिवारभ्य विधायागाधत्वेनानुप-लक्षित हर्षविषादतया etc.

folio 47 a of 17 th sarga

श्रीहर्षमिति । एककर्तृकत्वात्स्वसुर्भागिन्याः छिंदस्प राजविशेषस्य प्रशस्ते वर्णना ग्रंथस्य सुसदृशि तुल्ये तद्भुवि श्रीहर्षरचिते सप्तदशयन्यं पूरणः स्वभाव-सुंदरसर्गः समाप्तः । छिंदप्रशस्तिरपि ग्रंथो मया कृत इति सूचितं । सोदय्य-श्रिव(र्यश्च)तुल्या भवंति । छंद' प्रशस्तोरीति निपाठे छंदोबंधक्रमस्वरूपनि-रूपणपरस्य ग्रंथस्येत्यर्थः । सप्तदश इति तस्य पूरणा इतिट् । तद्भुवि भाषित-पुंस्कं ॥ २२ ॥

॥ इति श्रीशेषरामचंद्रविरचितायां नैषधचरितभावद्योतनिकायां सर्वानव यकरण्यां सप्तदश' सर्गः ॥ ॥ संख्या १९५० श्रीरामचंद्राय नमः ॥
॥ श्रीकृष्णाय नमः ॥

Ends— folio 38^b

इति श्रीवेदकरोपनाम नारायणपंडितकृते नैषधियप्रकाशे एकोनविंश: सर्गः ॥ ग्रंथसंख्या ९२४ ॥
इति श्रीशेषरामचंद्रविरचितायां नैषधचरित भावद्योतनिकायां सर्वानवद्य करिण्यां एकोनविंशः सर्गः ॥ ॥ राम ॥ कृष्ण ॥

References.— See No. 359

नैषधीयप्रकाश Naiṣadhīyaprakāśa

No. 368 500. / 1887-91.

Size.—$11\frac{1}{4}$ in. by $4\frac{1}{4}$ in.

Extent.— 34 leaves; 8 lines to a page; 41 letters to a line.

Description.— Country paper; very old musty, and brittle; borders ruled with triple black lines; hand-writing bold and legible; the Ms. contains only the commentary on the 10th Sarga.

Age.— The Ms. appears to be old.

Author.— Nārāyana Bedaikai Son of Narasimha-pandita.

Subject.— Kāvya (comm. on the Naiṣadhīya of Śrīharsa).

Begins.—

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरूभ्यो नम ॥ इदानीं स्वयंवरस्य पूर्वरंगवर्णनार्थं दशमसर्गमारभते ॥ रथैरिति ॥ अथ क्रमादाः प्रादुर्भूत तरूमानो राजानो रथै. कृत्वा प्रारब्धवर स्वयंवर आयुः आजग्मु

Ends.—

न केवलं काव्यनिर्माण एव कुशल किंतु तर्कशास्त्रेप्यसम केनाप्यतुल्योभ्यासो यस्य ॥ ३७ ॥

इति श्रीवेदरकरोपनाम श्रीमन(न्र?)सिंहपंडितात्मजनारायणकृते नैषधयिप्रकाशे दशमः सर्गः

References.— See No. 359

नैषधीयचरित
with
दीपिका

Naiṣadhīyacarita
with
Dīpikā

No. 369

146.
1882–83.

Size.— 10 in. by $4\frac{1}{4}$ in.

Extent.— 158 leaves ; 21 lines to a page ; 50 letters to a line.

Description.— Country paper, thick but worn out and brittle ; and very much brown in appearance ; Devanāgarī characters hand-writing small but uniform and legible ; the Ms. is very carefully written ; borders ruled with double red lines ; colophons of Sargas appear on the following folios :—

Sarga	folio	Sarga	folio	Sarga	folio	Sarga	folio
I	13	VIII	62	XV	110	XXI	151
II	20	IX	71	XVI	116	XXII	158
III	28	X	80	XVII	123		
IV	34	XI	88	XVIII	131		
V	43	XII	95	XIX	136		
VI	50	XIII	99	XX	143		
VII	57	XIV	105				

Colophons of Sargas are maked out with red pigment; folios 100 and 140 damaged and torn up.

Age.— The Ms. appears to be very old.

Author.— Narahari, Son of Svayambhu and Nālamā.

Subject.— Kāvya (comm. on the Naiṣadhīyacarita of Śrīharsa).

Begins.—

ॐ नमः ॥

पारं प्रबंधांबुनिधेः प्रयातुं यत्न· खिलस्यादपराश्रयाय ।

हेलाविनिर्द्धूत समस्तविघ्नं हेरंबमालंबनमाश्रयेहं ॥ १ ॥

(the rest of the verses as in Indin office Ms No. 1955 described on p 1438 part VII, of I. O. Des. Catalogue 1904)

Ends.—

यं प्रासूत त्रिलिंग क्षितिपतिसततारा धितांघ्रि स्वयंभूः ।

पातिव्रत्यैकसीमा सुकविनरहरिं नालमां या च माता ॥

यं विद्यारण्ययोगी कलयति कृपया तत्कृतौ दीपिकायां ।

द्वाविंशश्चारुसर्गः सुकृतसुखयशोधाम नरिाजिताभूत् ॥ १ ॥

शशांकवर्णननाम द्वाविंशः सर्ग संपूर्णः ॥ श्री ॥

